॥ श्री जिनाय नमः ॥

# ॥ श्री संप्रतिराजकथा ॥

( गुर्जरभाषांतरोपेता )

छपावी प्रसिद्ध करनार,

पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

विक्रम संवत् १९८०  वीर संवत् २४५०  सने १९२३

मूल्यम् रु. २-८-०

॥ श्री जिनाय नमः ॥

श्रीचारित्रविजयगुरुभ्यो नमः

# ॥ अथ श्रीसंप्रतिराजकथा प्रारभ्यते ॥

( गुर्जरभाषांतरसहिता )

भाषांतर करी छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

आसीदिहावसर्पिण्यां । चतुर्विंशो जिनेश्वरः ॥ आत्तलोकातिगैश्वर्यः । श्रीवीरस्त्रिजगत्प्रभुः ॥ १ ॥

आ अवसर्पिणीमां अलौकिक ऐश्वर्यवाला अने त्रणे जगत्‌ना स्वामी एवा चोवीसमा तीर्थंकर श्रीवीरप्रभु थया. ॥ १ ॥

स्वामिना च सुधर्माख्यः । पंचमो गणभृद्वरः ॥ भविष्यत्येष संतानी–त्यध्यास्यत निजे पदे ॥ २ ॥

आ उत्तम पांचमा गणधर श्रीसुधर्मास्वामी मारा संतानी ( शासननायक ) थशे, एम विचारीने श्रीमहावीरप्रभुए तेमने पोतानी पाटे स्थाप्या. ॥ २ ॥

शिष्यस्तस्याभवज्जंबू–जांबूनदसमप्रभः ॥ नादाल्लोभादिवान्यस्य । केवलश्रियमाप्य यः ॥ ३ ॥

ते सुधर्मास्वामीना सुवर्ण सरखी कांतिवाळा जंबू नामे शिष्य थया, के जेमणे जाणे लोभथी होय नहि ? तेम पोते मेळवेली केवलज्ञानरूपी लक्ष्मी बीजा कोइने आपी नहि. ॥ ३ ॥

अजायत विनेयस्तत्–प्रभवः प्रभवः प्रभुः ॥ व्रतेऽप्यजून्मनोहारी । नृणां शीलं हि दुस्त्यजं ॥४॥

ते जंबूस्वामिना प्रभवस्वामी नामे शिष्य थया के जे महाव्रतयुक्त छतां पण ( लोकोना ) मनने हरनारा थया, केमके माणसोनी आदत छूटी शकवी मुश्केल छे. ॥ ४ ॥

अंतेवासी स तस्यासी–द्भट्टः शय्यंभवः पुनः ॥ आतीर्थस्थायि यश्चक्रे । दशवैकालिकं श्रुतं ॥ ५ ॥

वळी ते श्रीप्रभवस्वामीना शय्यंभवभट्ट नामे शिष्य थया, के जेमणे छेक महावीरस्वामीना शासन सुधी रहेनारुं दशवैकालिक सूत्र बनाव्युं ॥ ५ ॥

यशोभद्रयशोभद्र–सूरिस्तस्मादजायत ॥ पुनस्ततोऽपि संभूतः । संभूत इति विश्रुतः ॥ ६ ॥

ते शय्यंभवसूरि पछी महा यशस्वी यशोभद्र नामे आचार्य थया, अने तेना पछी प्रख्यात एवा संभूताचार्य थया. ॥ ६ ॥

भद्रबाहुर्भद्रबाहु–मुख्योऽभूत्तणभृत्ततः ॥ निर्युक्तयः कृता येन । श्रुतसद्मप्रदीपिकाः ॥ ७ ॥

तेवार पछी उत्तम हाथवाळा भद्रबाहुस्वामी नामे मुख्य गणधर थया के जेमणे सूत्ररूपी घरने दीपाववा माटे दीवा सरखी निर्युक्तिओ करेली छे. ॥ ७ ॥

युगप्रधानतां भेजे । स्थूलभद्रस्ततः परं ॥ यस्तृणीकृतकंदर्पः । पश्चिमः श्रुतकेवली ॥ ८ ॥

तेवारपछी स्थूलभद्रजीए युगप्रधानपणाने धारण कर्युं, (अर्थात् भद्रबाहुस्वामिनी पाटे स्थूलभद्रजी थया) के जेमणे तृणनी पेठे कामदेवनो तिरस्कार कर्यो छे, तथा जे छेल्ला श्रुतकेवली हता. ॥ ८ ॥

शिष्यौ बभूवतुस्तस्य । महागिरिसुहस्तिनौ ॥ निरस्ताशेषतमसौ । सूर्यचंद्रमसाविव ॥ ९ ॥

ते स्थूलभद्रजीना, सर्व अज्ञानरूपी अंधकारने नाश करनारा सूर्य अने चंद्रमा सरखा आर्यमहागिरि अने आर्यसुहस्ति नामना बे शिष्यो थया. ॥ ९ ॥

पृथक् पृथग्गणं दत्वा । गुरुणा स्थापितावपि ॥ गाढस्नेहौ सतीर्थ्यत्वा–द्भूतां सहचारिणौ ॥१०॥

तेओ बन्नेने गुरुए जुदो जुदो शिष्यसमुदाय सोंपीने पोतानी पाटे स्थाप्या हता, तो पण सहाध्यायी होवाथी अत्यंत स्नेह पूर्वक तेओ बन्ने साथे विहार करता हता. ॥ १० ॥

अन्यदा तौ विहारेण । कौशांबीं जग्मतुः पुरीं ॥ दुष्कालेकाश्रयालाभा–त्तस्थतुः पृथगाश्रयौ ।११।

हवे एक वखते तेओ बन्ने विहार करताथका कौशांबी नगरीमां गया, परंतु त्यां दुकाळने लीधे एकीसाथे रहेवानो उपा-
श्रय न मळवाथी तेओ बन्ने जुदा जुदा उपाश्रयमां रह्या. ॥ ११ ॥

**तदा च वर्तते कालः। कालवद्भैक्ष्यजनोजिनां ॥ स्वप्नेऽपि दृश्यते यत्र। नान्नलेशोऽपि तैः क्वचित्॥ १२॥**

हवे ते वखते भिक्षुको माटे यम सरखो दुष्काळ पडेलो छे के जेथी तेओ कोइपण जगोए अन्ननो लेश मात्र त्यां स्वप्ने
पण जोता नथी. ॥ १२ ॥

**साधुसंघाटकस्तत्र । भिक्षाहेतोः सुहस्तिनः ॥ प्रविवेश धनाढ्यस्य । धनसार्थपतेर्गृहं ॥ १३ ॥**

हवे त्यां श्रीआर्यसुहस्ति महाराजना बे साधुओ भिक्षा माटे धन नामना एक धनाढ्य सार्थवाहना घरमां गया ॥ १३ ॥

**अभ्युत्तस्थौ मुनी दृष्ट्वा । सहसा रभसाद्धनः ॥ उदंचदुच्चरोमांचः । प्राणंसीच्चातिभक्तितः ॥ १४ ॥**

हवे ते वखते ते बे मुनीओने जोइने ते धनसार्थवाह एकदम अचानक उभो थइ गयो, अने उभां थयेलां छे रुंवाळां जे-
मना एवा तेणे अत्यंत भक्तिथी तेओने नमस्कार कर्यो. ॥ १४ ॥

**अथादिशत् प्रियां सिंह—केसरादिकमद्भुतं ॥ आनयाहारसंभारं । येनैतौ प्रतिलाभये ॥१५॥**

पछी ते धनसार्थवाहे पोतानी स्त्रीने हुकम कर्यो के सिंहकेसरिया मोदक विगेरे अद्भुत मोदकनो समूह लाव ? के जेथी
हुं आ बन्ने मुनिओने वहोरावुं. ॥ १५ ॥

तयापि सर्वमानिन्ये । लब्धं कल्पद्रुमादिव ॥ अनिच्छद्भ्यामपि ताभ्यां । बलात्तं सर्वमप्यदात् ॥१६॥

त्यारे स्त्री पण जाणे कल्पवृक्षथी मेळव्युं होय नही, तेम सघळुं लावी, अने नहीं इच्छता एवा पण ते बन्ने साधुओने ते सघळुं वहोरावी दीधुं. ॥ १६ ॥

रंकः कश्चित्तदा तत्र । भिक्षार्थं तद्गृहागतः ॥ तद्दानग्रहणे दृष्ट्वा । चिंतयामास विस्मितः ॥ १७ ॥

हवे ते वखते त्यां कोइक रांक भिक्षुक तेने घेर भिक्षा माटे आव्यो हतो ते आ साधुओने आपेलुं दान अने तेओए करेलुं ग्रहण जोइने आश्चर्य पामी विचारवा लाग्यो के-॥ १७ ॥

अहो धन्याः कृतार्थाश्च । जगत्यत्रैत एव हि ॥ देवतामिव यानेवं । नमंत्येवंविधा अपि ॥ १८ ॥

अहो आ जगतमां खरेखर आ साधुओज धन्य अने कृतार्थ छे के जेओने आवा धनवानो पण देवतानी पेठे आवीरीते नमे छे. ॥ १८ ॥

नूनं भिक्षुकताप्येषां । स्वर्गादप्यधिकायते ॥ यदेवं प्रतिलाभ्यंते । खंडखाद्यैः सुधातिगैः ॥ १९ ॥

वळी आ साधुओनुं भिक्षुकपणुं पण खरेखर स्वर्गथकी पण अधिक छे, केमके जेओने अमृतथी पण अधिक लाडुओ आवी रीते मळे छे. ॥ १९ ॥

दैन्यं प्रकाशयंतोऽपि । नारका इव मादृशाः ॥ नान्नलेशमपि क्वापि । लभंते नु कुतोऽपि हि ॥२०॥

अने नारकी जेवा मारा सरखा रंकोने करगरीने कालावाला करतां छतां कोइपण रीते क्यांयथी अन्ननो लेशमात्र पण मळतो नथी. ॥ २० ॥

दैन्यातिरेकाद्दत्ते चे-त्कोऽपि किंचित्कदाचन ॥ तदप्युन्मिश्रमाक्रोशैः । कालकूटकणायितैः ॥ २१ ॥

वळी अत्यंत करगरवाथी कोइ कदाच कंइक आपे छे, ते पण झेरना कणीयाओ सरखां दुर्वचनो वडे मिश्रित थयेलुं होय छे. २१

साधुलब्धी ततः साधू । एतावेवाहमर्थये ॥ दद्यातां यद्यमू किंचि-त्कारुण्यात्करुणाधनौ ॥ २२ ॥

माटे दयारूपी धनवाळा आ बन्ने साधुओ दयाथी जो कंइक मने आपे, तो हुं उत्तम लब्धिवाळा एवा आ बे साधुओनी पासेज याचना करुं. ॥ २२ ॥

विमृश्यैवं ययाचेऽसौ । साधू तावप्यवोचतां ॥ भद्रावामस्य वाहीका-वेव स्वामी गुरुः पुनः ॥२३॥

एम विचारीने ते रंक भिक्षुए ते बन्ने साधुओ पासे ( अन्ननी ) याचना करी, त्यारे तेओए कह्युं के, हे भद्र! अमो तो फक्त आ भिक्षान्न उपाडनारा मजूरोसरखा छीये, अने तेना मालिक तो ( अमारा ) गुरु छे. ॥ २३ ॥

सोऽन्वगात्तौ ततोऽन्नार्थी । भक्तितोऽनुव्रजन्निव ॥ दृष्ट्वाश्रयस्थितांश्चाग्रे । याचतेस्म गुरूनपि ॥२४॥

पछी अन्ननो अर्थी एवो ते रंक जाणे भक्तिथी पाछळ जतो होय नही? तेम ते बन्ने साधुओनी पाछळ गयो, तथा उपाश्रयमां अगाडी बेठेला गुरुने जोइने तेणे ते गुरु पासे पण अन्न माटे याचना करी. ॥ २४ ॥

गुरोराख्यायि साधुभ्या–मावामप्यमुनार्थितौ ॥ श्रुतोपयोगगुरव–स्ततस्तद्विषयं ददुः ॥ २५ ॥

ते वखते ते बन्ने साधुओए गुरुमहाराजने कह्युं के, हे भगवन्! आ भिक्षुके अमारी पासे पण अन्न माटे याचना करी हती, ते सांभळी श्रुतज्ञानी गुरुए ते रंक संबंधि श्रुतोपयोग आप्यो. ॥ २५ ॥

महान् प्रवचनाधारो । नूनमेष भविष्यति ॥ इति तेन परिज्ञाय । गुरवस्तं बभाषिरे ॥ २६ ॥

एवी रीतना श्रुतोपयोगथी गुरुमहाराजे जाण्युं के, खरेखर आ रंक भिक्षुक शासननी अति उन्नति करनारो थशे, एम जाणी तेओए तेने कह्युं के–॥ २६ ॥

व्रतं गृह्णासि चेद्भद्र । तद्ददामस्तवेप्सितं ॥ स उवाच प्रभोऽस्त्वेवं । कः कल्याणं न वांछति ।२७।

हे भद्र! जो तुं चारित्र ग्रहण करे, तो तने अमो मनोवांछित भोजन आदिक आपीयें, त्यारे ते रंके कह्युं के, हे भगवन्! भले तेम थाओ? कारण के कल्याणने कोण न इच्छे? ॥ २७ ॥

ततस्तदैव दीक्षित्वा । भोजनायोपवेशितः ॥ भुक्तवानाकटीकंठ–माहारांस्तांस्तथाविधान् ॥ २८ ॥

पछी गुरुमहाराजे तेज वखते तेने दीक्षा आपीने भोजन करवा माटे बेसाड्यो, अने तेणे पण छेक कटीथी मांडीने कंठ सुधी तेवा मनोहर मोदक विगेरेनुं घणुंज भोजन कर्युं. ॥ २८ ॥

**वातसंभृतभस्त्रेव । ततश्चास्फुरितोदरः ॥ क्षणं शेतेस्म मध्याह्ने । श्राद्धभुक्त इव द्विजः ॥ २९ ॥**

अने तेथी वायुथी भरेली धमणनी पेठे तेनुं उदर फूली गयुं, अने तेथी श्राद्धमां जमी आवेला ब्राह्मणनी पेठे ते मध्याह्न वखते क्षणवार सूतो. ॥ २९ ॥

**अतिस्निग्धेऽतिमात्रे च । तत्राजीर्यत्यथाशने ॥ शूलार्त्ताश्व इवावेल्ल-ज्जातगूढविसूचिकः ॥ ३० ॥**

त्यारबाद अत्यंत घृतवाळुं ते अतिशय भोजन तेने नहिं पचवाथी शूलनी व्याधिवाळा घोडानी पेठे उदरमां गुप्तरीते विसूचिका थवाथी आळोटवा लाग्यो. ॥ ३० ॥

**ततो गुरुर्बभाषे तं । किं किंचिद्वत्स भोक्ष्यसे ॥ सोऽवदत्किं प्रभो क्षुत्स्यात् । कल्पद्रोरपि संनिधौ ३१**

त्यारे गुरुमहाराजे तेने कह्युं के, हे वत्स! हवे तारे शुं कंइ खावुं छे? त्यारे तेणे कह्युं के, हे प्रभो! ( आप सरखा ) कल्पवृक्षना आश्रयथी शुं हवे मने क्षुधा होय? ॥ ३१ ॥

**सांप्रतं किंत्विदं याचे । स्यातां मे त्वत्पदौ गतिः ॥ इति जल्पन्ननल्पार्त्तिः । प्रक्षीणायुर्विपद्य सः ३२**

सामायिकस्याऽव्यक्तस्य । प्रभावादुपपद्यत ॥ रंकः सैष सुतो यस्य । सान्वयः सोऽथ कथ्यते ।३३। । युग्मं।

परंतु आ समये हुं एटलुं मागुं छुं के, मारी गति आपना चरणोमां थाओ ? एम बोलतो थको अति वेदनाथी आयुना क्षयवडे मृत्यु पामीने ते रंक अव्यक्त सामायिकना प्रभावथी जेनो पुत्र थयो, ते राजानुं तेना वंश सहित वर्णन हवे कहे छे. ३२ ३३

इहास्ति प्रथमद्वीपे । भरतक्षेत्रभूषणं ॥ फुल्लनिःप्रतिमल्लश्री—र्गोल्लदेशः सुखैकभूः ॥ ३४ ॥

अहीं पहेला जंबूद्वीपमां भरतक्षेत्रमां आभूषण सरखो, अने विस्तार पामेली अनुपम लक्ष्मीवाळो, तथा सुखोनी भूमी सरखो " गोल्ल " नामे देश छे. ॥ ३४ ॥

ग्रामोऽस्ति चणकग्राम—नामकस्तत्र विश्रुतः ॥ बहुधान्यमनोहारी । गोरसाढ्यः सुकाव्यवत् ॥ ३५ ॥

ते गोल्लदेशमां उत्तम काव्यनी पेठे घणे प्रकारे अन्य विद्वानोना मनने हरनारुं ( पक्षे—घणां धान्योनी निष्पत्तिथी मनोहर थयेलुं ) तथा वाणीना रसवाळुं ( पक्षे—घृत, दूध, दहींरूप गोरसनी समृद्धिवाळुं ) चणक नामनुं प्रख्यात गाम छे. ॥ ३५ ॥

चणीति ब्राह्मणस्तत्र । सच्चरित्रपवित्रधीः ॥ अर्हद्धर्मविशुद्धात्मा । श्रद्धालुः श्रावकोत्तमः ॥ ३६ ॥

ते गाममां उत्तम आचारथी निर्मल बुद्धिवाळो, श्रीवीतराग प्रभुना धर्मथी पवित्र आत्मावाळो, श्रद्धावंत, अने उत्तम श्रावकधर्म पालनारो " चणी " नामनो एक ब्राह्मण रहेतो हतो. ॥ ३६ ॥

प्राप्तोत्कर्षाणि हृद्ग्रामे । विद्यास्थानानि नित्यशः ॥ चतुर्दशापि निर्बाधं । यस्यावात्सुः कुटुंबिवत् ३७

ते ब्राह्मणना हृदयरूपी गाममां कोइ पण प्रकारनी बाधाविना उंची कोटीने पामेलां विद्यानां चौदे स्थानको हमेशां कुटुंबिओनी पेठे निवास करी रह्यां हतां, अर्थात् ते चौदे विद्यानो पारंगामी हतो. ॥ ३७ ॥

आगुस्तत्रान्यदाचार्याः । श्रुताः सागरसूरयः ॥ तद्गृहोपरिभूम्यां च । नृपास्थान्यामिव स्थिताः ३८

हवे एक वखते सागरसूरि नामना प्रख्यात आचार्य ते गाममां पधार्या, अने राजसभा सरखा ते चणीब्राह्मणना घरना उपला मालपर रह्या. ॥ ३८ ॥

तदा च तत्र तत्कांता–ऽसूत सूनुं चणेश्वरी ॥ प्ररूढदाढं प्रागेव । प्राचीवार्कं स्फुरत्प्रभं ॥ ३९ ॥

हवे ते वखते त्यां ते ब्राह्मणनी चणेश्वरी नामनी स्त्रीए, पूर्वदिशा जेम सूर्यने तेम प्रथमथीज ( मुखमां ) उगेली दाढवाळा अने स्फुरायमान कांतिवाळा एक पुत्रने जन्म आप्यो. ॥ ३९ ॥

कृत्वा जन्मोत्सवं तस्य । द्वादशे दिवसे ततः ॥ चक्रे चाणिक्य इत्याख्या–मुत्सवेन महीयसा ४०

पछी तेनो जन्मोत्सव कर्याबाद बारमे दिवसे महोटा उत्सवपूर्वक ते बाळकनुं " चाणिक्य " नाम पाडवामां आव्युं. ४०

ततश्चणी तनूजं तं । वंदयित्वा गुरोः क्रमान् ॥ दाढावृत्तांतमाचख्यौ । पृच्छतिस्म च तत्फलं ॥४१॥

पछी ते चणी ब्राह्मणे पोतानां ते पुत्रने गुरुने पगे लगाडीने तेनी दाढनुं वृत्तांत कह्युं, तथा तेनुं फल पूछयुं. ॥ ४१ ॥

गुरवोऽतींद्रियज्ञान-समक्षसमयत्रयाः ॥ आख्यन्नेष महाराजो । भविष्यति महामतिः ॥ ४२ ॥

पोताना अतींद्रिय ज्ञानथी त्रिकाळने जोइ रहेला एवा ते गुरुमहाराजे तेने कह्युं के, आ तारो पुत्र महाबुद्धिवान महोटो राजा थशे. ॥ ४२ ॥

अथ सोंतर्गृहं गत्वा । दध्यौ सूनुर्ममापि किं ॥ कृत्वानर्थावहं राज्यं । गमिष्यत्यधमां गतिं ॥४३॥

पछी ते चणी ब्राह्मणे पोताना घरनी अंदर जइ विचार्युं के, शुं आ मारो पुत्र पण अनर्थोथी भरेलुं राज्य करीने नीची गतिमां जशे? ॥ ४३ ॥

ततः प्रघृष्य तद्दाढा—श्चणी बालकरश्मिना ॥ गुरोरावेदयामास । स्वरूपं तद्यथा कृतं ॥ ४४ ॥

पछी ते चणी ब्राह्मणे ते बाळकनी दाढ पांचीकाथी घसी नाखीने ते मुजबनी ते हकीकत गुरुमहाराजने निवेदन करी. ४४

गुरुः प्रोवाच तं भद्र । किमिदं विदधे त्वया ॥ यद्यथोपार्जितं येन । भोक्तव्यं तेन तत्तथा ॥४५॥

त्यारे गुरुमहाराजे तेने कह्युं के, हे भद्र! आ तें शुं कर्युं? केमके जे प्राणीए जे कंइ जे रीते उपार्जन करेलुं होय छे, ते तेवी रीते तेने भोगववुं पडे छे. ॥ ४५ ॥

त्वया यद्याप्यघृष्यंत । दाढाः सूनुस्तथाप्यसौ ॥ बिंबं किंचिद्विधायैष । प्राज्यं राज्यं करिष्यति ४६

वळी जो के तें तेनी दाढाओ घसी नाखी छे, तो पण तारो आ पुत्र कोइकने आगेवान करीने महान् राज्य भोगवशे. ४६

**अथ प्रवर्धमानोऽसौ । चाणिक्यस्त्यक्तशैशवः ॥ विद्याः सर्वास्तदाचार्या–द्व्यं धनमिवाददे ॥४७॥**

हवे बाल्यपणुं व्यतीत करीने वये वृद्धि पामता एवा ते चाणिक्ये लेणा धननी पेठे कलागुरु पासेथी सर्व विद्या प्राप्त करी. ॥ ४७ ॥

**अथानुरूपां पुत्रस्य । मृगांकस्येव रोहिणीं ॥ विलोक्य ब्राह्मणीमेकां । चणीति पर्यणाययत् ॥४८॥**

हवे चंद्रने जेम रोहिणी तेम पोताना ते पुत्रने योग्य एवी एक ब्राह्मणीने जोइने चणीए परणावी. ॥ ४८ ॥

**ततः पितरि कालेन । क्रमात्कवलितेऽपि हि ॥ सुधीर्वैतृष्ण एवास्था–द्वर्षास्विव सदैव सः ॥४९॥**

त्यारबाद अनुक्रमे ते चाणिक्यना पिताने काळे खाइ जवाथी, अर्थात् तेना पिताना मृत्युबाद उत्तम बुद्धिवान् एवो ते चाणिक्य वर्षाकाळमां जेम तेम हमेशां तृष्णा रहितज रह्यो, अर्थात् संतोषी रह्यो. ॥ ४९ ॥

**अन्यदा दयिता तस्य । भ्रातुः परिणयोत्सवे ॥ ययौ पितृगृहं तस्या । याम्योऽन्या अपि चागमन् ५०**



हवे एक वखते ते चाणिक्यनी स्त्री पोताना भाइना विवाहमहोत्सवमां पोताना पिताने घेर गइ, अने ते प्रसंगे तेनी बीजी बहेनो पण त्यां आवी. ॥ ५० ॥

तासां महेभ्यकांताना–मेयुषीणां महाश्रिया ॥ मातापित्रादयः सर्वे । कुर्वंत्यत्यंतगौरवं ॥ ५१ ॥

तेणीनी ते बीजी बहेनो धनाढ्योनी स्त्रीओ होवाथी ( आभूषणो विगेरेना ) घणा वैभव सहित त्यां आवी हती, अने तेथी तेना मातापिता आदिक सर्वे कुटुंबीओ तेओनुं घणुं सन्मान करता हता. ॥ ५१ ॥

काचिदभ्यंगयत्यंग–मुद्वर्तयति चापरा ॥ कापि स्नपयति स्नेहा–द्विलेपयति कापि च ॥ ५२ ॥

कुटुंबनी कोइक स्त्री तेओने शरीरे ( सुगंधि तैलादिक ) चोळती हती, कोइक पीठी करती हती, कोइक स्नेहपूर्वक तेओने स्नान करावती हती, तथा कोइक तेओने शरीरे ( चंदन आदिकनुं ) विलेपन करती हती. ॥ ५२ ॥

कापि संस्कुरुते पादौ । काप्याबध्नात्यलंकृतीः ॥ वीजयंति च ताः काश्चि–दुपात्तैर्हस्तशाटकैः ५३

वळी कोइक तेओना पगो धोती हती, तथा कोइक तेओने आभूषणो पहेरावती हती. अने केटलीक तो हाथमां रुमालो लेइने तेओने पवन नाखती हती. ॥ ५३ ॥

उपचारवचोभिश्च । सदाप्युल्लापयंत्यपि ॥ किं बहूक्तेन राज्ञीव–त्सर्वेप्याराधयंति ताः ॥ ५४ ॥

वळी कुटुंबना सर्व माणसो तेओने हमेशां मीठां मीठां वचनोथी बोलावता हता, वधारे शुं कहेवुं? राणीनी पेठे तेओने सर्व कोइ आराधता हता. ॥ ५४ ॥

कार्यते कर्म दासीव । चाणिक्यस्य पुनः प्रिया ॥ दरिद्रदयितेत्याप । सत्कृतिं न कुतोऽपि सा ॥५५॥

अने चाणिक्यनी ते स्त्री पासे तो दासीनी पेठे सर्व कोइ काम करावता हता, अने ए रीते निर्धननी स्त्री होवाथी ते बिचारीनो कोइ पण सत्कार करतुं नही. ॥ ५५ ॥

विवाहानंतरं ताश्च । दिव्यचीनांशुकादिभिः ॥ सत्कृत्य सपरीवाराः । प्रेष्यंतेस्म सगौरवं ॥ ५६ ॥

विवाह थइ गया बाद ते सघळी धनाढ्य दीकरीओने ( तेओना मातापिताए ) मनोहर चीनाइ साडी आदिकनी पहेरामणी आपीने घणा आदरसत्कारपूर्वक परिवार सहित ( तेओने घेर ) मोकलावी आपी. ५६ ॥

दत्वा चाणिक्यपत्नी च । वाससी गोणिविभ्रमे ॥ गच्छेर्वत्सेऽध्वगैः सार्ध-मित्युक्त्वा प्रेषिता गृहात् ॥५७॥

तथा ते चाणिक्यनी स्त्रीने गुणीया जेवां ( जाडां ) बे कपडां आपीने कह्युं के हे वत्स! तुं कोइ वटेमार्गुओ साथे ( तारे घेर ) चाली जजे, एम कही तेणीने घरमांथी विदाय करी दीधी. ॥ ५७ ॥

तदा साचिंतयद्धिग् धिग् । दारिद्र्यमपमानदं ॥ यत्र मातापितृभ्योऽपि । भवत्येवं पराभवः ॥५८॥

त्यारे ते बिचारी विचारवा लागी के, अपमानने आपनारां एवां आ दारिद्र्यने धिक्कार थाओ ! के जेने लीधे मावाप तरफथी पण आवो तिरस्कार थाय छे. ॥ ५८ ॥

पराभवमिवोज्झंती । दृग्भ्यामश्रुमिषात्ततः ॥ आजगाम गृहं पत्यु-र्नव्यांबुदसमानना ॥ ५९ ॥

पछी आंखोमांथी पडतां आंसुओना मिषथी जाणे पोताने थयेला तिरस्कारने छोडती होय नही ? तथा नवा वरसादनी पेठे झांखु थयेलुं छे मुख जेनुं, एवी ते पोताना स्वामिने घेर आवी. ॥ ५९ ॥

प्रियः पप्रछ किं खिन्ने-वागतापि पितुर्गृहात् ॥ नोचे किंचित्पुनर्गाढं । पृष्टाख्यत्तं पराभवं ॥ ६० ॥

त्यारे तेना स्वामी चाणिक्ये तेणीने पूछयुं के, हे प्रिये! तारा पिताने घेरथी तुं आवी छो छतां केम झंखवाणी जेवी लागे छे? ( ते सांभळी ) ते कांइ बोली नही, परंतु आग्रहवडे पूछवाथी तेणीए पोताना ते तिरस्कारनी हकीकत जणावी. ।६०।

तत् श्रुत्वा सोऽपि संक्रांत-तत्खेदवदचिंतयत् ॥ अर्थ एव हि गौरव्यो । न कौलीनं न वा गुणाः ॥ ६१ ॥

ते सांभळीने जाणे तेणीनो खेद तेनामां पण दाखल थयो होयनी ? तेम ते पण विचारवा लाग्यो के, खरेखर धनज सन्मान अपावनारुं छे, कुलीनता अथवा गुणो सन्मान अपावनारां नथी. ॥ ६१ ॥

कलावानपि राजापि । न भाति क्षीणवैभवः ॥ कुबेरोऽपि कुलीनोऽपि । श्लाघ्यते धनवान् पुनः ।६२।

वैभवरहित थयेलो कलावान् राजा (चंद्र) पण शोभतो नथी, कुलीन (पक्षे-पापी) एवो कुबेर (कदरूपो) पण जो धनवान होय तो प्रशंसा पामे छे. ॥ ६२ ॥

वित्ताढ्य एव सर्वत्र । प्रतिष्ठां लभते जने ॥ कांचनश्रियमाबिभ्रन्मेरुः क्षितिभृतां धुरि ॥ ६३ ॥

आ दुनीयामां सर्व जगोए धनवानज पूजाय छे, केमके सुवर्णनी लक्ष्मीने धारण करतो मेरुपर्वत सर्व पर्वतोनो नायक कहेवाय छे. ॥ ६३ ॥

सत्यां भवंत्यसंतोऽपि । यांत्यां संतोऽपि यांति च ॥ यया सार्धं गुणाः सर्वे । सा श्रीरेकैव नंदतु ॥६४॥

लक्ष्मीनी हयातीथी अछता गुणो पण आवे छे, अने लक्ष्मीना जवाथी छता गुणो पण चाल्या जायछे, माटे एवी रीते जेनी साथे सर्वे गुणो रहेला छे, एवी ते एक लक्ष्मीज ( आ जगतमां ) जयवंती वर्तेछे. ॥ ६४ ॥

अर्थश्चिंतामणिरेव । चिंतितार्थप्रसाधकः ॥ तन्मयाप्यर्जनीयोऽसौ । तदेकमनसाधुना ॥ ६५ ॥

वांछित अर्थोने साधनारुं एवुं धन चिंतामणि रत्नज छे, माटे हवे मारे पण तन्मय हृदयथी ते धनज उपार्जन करवुं जोइये. ॥ ६५ ॥

श्रुतश्च पाटलीपुत्रे । नंदो विप्रसुवर्णदः ॥ ततस्तं मार्गयामीति । ध्यात्वा तत्राशु सोऽगमत् ॥६६॥

में सांभल्युं छे के पाटलीपुत्र नगरमां नंदराजा ब्राह्मणोने सुवर्ण आपे छे, माटे तेनीपासे जइ याचना करुं, एम विचारीने ते चाणिक्य तुरत त्यां गयो. ॥ ६६ ॥

प्राविक्षच्च नृपावासे । दैवात्केनाप्यवारितः ॥ आक्रम्य राजवद्राज-सिंहासनमुपाविशत् ॥ ६७ ॥

दैवयोगे कोइए पण नही अटकाववाथी ते राजाना मेहेलमां गयो, तथा त्यां राजानीपेठे राजानुं सिंहासन दबावीने तेपर बेशी गयो. ॥ ६७ ॥

इतः स्नातविलिप्तांगः । सर्वालंकारभूषितः ॥ नैमित्तिकभुजालंबी । तत्रागान्नंदभूपतिः ॥ ६८ ॥

एवामां स्नानपूर्वक ( चंदनआदिक ) लेपन करेलां शरीरवाळो, तथा सर्व आभूषणोथी शोभितो थयेलो, एवो नंदराजा निमित्तिआनो हाथ पकडीने त्यां आवी लाग्यो. ॥ ६८ ॥

पुरश्चाणिक्यमालोक्य । नृपमूचे निमित्तवित् ॥ देवायमेवमासीनो । धत्ते त्वद्वंशपर्शुतां ॥ ६९ ॥

एवामां अगाडी चाणिक्यने जोइने ते निमित्तिओ बोल्यो के, हे देव! आवी रीते बेठेलो आ माणसज तारा वंशने ( छेदवाने) कुहाडा समान छे. ॥ ६९ ॥

अरोषयद्भिस्तद्देव । साम्ना च विनयेन च ॥ असावुत्थापनीयोऽस्मा-ज्ज्वालितेन किमग्निना ॥७०॥

माटे हे देव! क्रोध कर्या विना मिष्ट वचनथी विनयपूर्वक आ ब्राह्मणने आ आसनपरथी उठाडवो, केमके अग्निने प्रदिप्त करवाथी शुं लाभ थाय? ॥ ७० ॥

राजादेशात्ततो दास्या । दत्तं तस्यान्यदासनं ॥ भक्तश्चैवमिहास्व त्वं । द्विज राजासनं त्यज ॥७१॥

पछी राजाना हुकमथी दासीए ते चाणिक्यने बीजुं आसन आपीने कह्युं के, हे ब्राह्मण! तुं आ आसनपर बेश? अने राजानुं आसन छोडी दे? ॥ ७१ ॥

सोऽथ दध्यौ न युक्तं तत् । यददत्तासनासनं ॥ अयुक्ततरमेतच्च । यदुत्थानं ततोऽपि हि ॥७२॥

हवे ते चाणिक्य विचारवा लाग्यो के, नहिं आपेलां आसनपर जे बेसवुं तेज प्रथम योग्य नथी, अने बेठाबाद तेवां आसनपरथी पण जे उठवुं, ते तो खरेखर तेथी पण वधारे अयोग्य छे. ॥ ७२ ॥

विमृश्येति स तामूचे-ऽत्र मे स्थास्यति कुंडिका ॥ ततस्तामभुचत्तत्रा-न्यत्र न्यास्थत्त्रिदंडिकां ॥७३॥

एम विचारिने तेणे ते दासीने कह्युं के, आ (तें आपेलां बीजां आसनपर तो) मारुं कमंडल रहेशे, एम कही तेपर तेणे कमंडल मूक्युं, वळी त्रीजां आसनपर तेणे पोतानो त्रिदंड मूक्यो. ॥ ७३ ॥

यज्ञोपवीतमन्यत्रे-त्यमुंचद्यद्यदासनं ॥ रुरोध तत्तदन्यान्यै-रासनं स ग्रहात्तवत् ॥ ७४ ॥

चोथां आसनपर जनोइ मूकी, एवी रीते ते दासी जे जे आसन मूकती गइ, ते ते सघळां आसनो एक ग्रथिल माणसनी-पेठे तेणे पोतानी जूदी जूदी वस्तुओथी रोकी दीधां ॥ ७४ ॥

धृष्टोऽयमिति राज्ञाथ । धृत्वा पद्भ्यामकर्षत ॥ सोऽपि भूमेरथोत्थाय । प्रतिज्ञासीदिदं यथा ।७५।

अरे! आ तो कोइक लुच्चो देखाय छे! एम कही राजाए तेना बन्ने पगो पकडीने तेने जमीनपर पछाड्यो, त्यारे तेणे पण जमीनपरथी ऊठीने नीचे जणाव्याप्रमुजब प्रतिज्ञा करी. ॥ ७५ ॥

कोशभृत्यमहामूलं । पुत्रमित्रादिशाखकं ॥ नंदमुत्पाटयिष्येऽहं । महाद्रुममिवानिलः ॥ ७६ ॥

वायु जेम महोटा वृक्षने उखेडी नाखे, तेम भंडार तथा नोकररूपी महान् मूलवाळा, तथा पुत्र अने मित्रविगेरेरूपी शाखाओवाळा आ नंदराजाने हुं जडमूळथी उखेडी नाखीश. ॥ ७६ ॥

शिखां बध्ध्वा च चाणिक्य-स्ततोऽवोचद्रुषारुणः ॥ संपूर्णायां प्रतिज्ञायां । शिखेयं छोटयिष्यते ।७७।

त्यारबाद क्रोधथी लालचोळ थयेला ते चाणिक्ये पोतानी चोटली बांधीने कह्युं के, ज्यारे मारी आ प्रतिज्ञा पूर्ण थशे त्यारेज हवे आ चोटली छूटशे. ॥ ७७ ॥

रोचते त्वत्पितुर्यत्तत् । कुर्यास्त्वमिति वादिनः ॥ दत्वार्धचंद्रं तं नंद-पत्तयो निरसारयन् ॥ ७८ ॥

तारा बापने गमे ते तुं करजे? एम कहीने नंदराजाना सुभटोए तेनी गरदन पकडीने तेने त्यांथी ( बहार ) कहाडी मेल्यो. ॥ ७८ ॥

स निर्यश्च पुराद्ध्यौ । कषायविवशात्मकः ॥ अज्ञानांधस्तदाकार्ष । प्रतिज्ञां महतीं हहा ॥ ७९ ॥

पछी नगरनी बहार निकळतां ते विचारवा लाग्यो के, अरेरे! ते वखते कषायना आवेशथी बेभान थयेला, तथा मूर्खाइथी आंधळा बनेला एवा में महामुश्केलीवाळी प्रतिज्ञा करी छे!! ॥ ७९ ॥

तदियं पूरणीयैव । मर्तव्यमथवाहवे ॥ नोपहास्यास्पदैः स्थातुं । शक्यं जीवद्भिरन्यथा ॥ ८० ॥

माटे हवे तो आ प्रतिज्ञा पूरीज करवी, अथवा तो रणसंग्राममां मरवुं, अन्यथा हांसीने पात्र जींदगी थी जीवी शकाय नही. ८०

तत्कथं स्यादिति ध्यातु–र्गुरुवाक्यं मनस्यभूत् ॥ भविष्यत्येष चाणिक्यो । बिंबांतरितराज्यकृत् ।८१।

माटे हवे केम थाय.? एम विचारतांथकां "आ चणिक्य कोइने नायक राखी पोते राज्य करनारो थशे " एवुं गुरुमहाराजे कहेलुं वचन तेना हृदयमां याद आव्युं. ॥ ८१ ॥

प्रतीच्यामप्युदेत्यंशु–र्विपर्यस्यति भूरपि ॥ मेरोरपि चलेच्चूला । चलत्यार्ष वचस्तु न ॥ ८२ ॥

त्यारे तेणे विचार्युं के, सूर्य कदाच पश्चिमदिशामां पण ऊगे, अने पृथ्वी पण उलटाइ जाय, तेम मेरुपर्वतनुं शिखर पण चलायमान थाय, परंतु ऋषिनुं कहेलुं वचन फरे नही. ॥ ८२ ॥

ततो बिंबनिरीक्षार्थं । परिव्राट्वेषमादधत् ॥ मयूरपोषकग्रामं । नांदं सोऽगात्परिभ्रमन् ॥ ८३ ॥

त्यारपछी ते चाणिक्ये नायकसरखा कोइक पुरुषनी तपासमाटे परिव्राजकनो वेष धारण कर्यो, तथा भमतो भमतो नंद राजाना मयूरोने पाळनाराओना गाममां गयो. ॥ ८३ ॥

प्रविवेश च भिक्षार्थं । समहत्तरमंदिरं ॥ उद्विग्नैस्तज्जनैः पृष्टो । भगवन् वेत्सि किंचन ॥ ८४ ॥

त्यां ते भिक्षामाटे ते मयूरपोषकोना नायकना घरमां गयो, एवामां गभराटमां पडेला ते नायकना माणसोए तेने पूछयुं के, हे भगवन्! तमो कंइ ( तंत्रविद्यादिक चमत्कार ) जाणो छो? ॥ ८४ ॥

सोऽवदद्वेद्मि निःशेषं । तमथोचे महत्तरः ॥ तर्हि पूरय मत्पुत्र्या-श्चंद्रमःपानदोहदं ॥ ८५ ॥

त्यारे ते चाणिक्ये कह्युं के, हुं तो सघळुं जाणुं छुं. त्यारे ते नायके कह्युं के, त्यारे तो मारी पुत्रीनो चंद्रपाननो दोहलो तमे संपूर्ण करो? ॥ ८५ ॥

यतः सास्ति तदप्राप्त्या । प्रस्थितेव यमालये ॥ तदेतं पूरयन्नस्या-स्त्वं जीवातुर्भवाधुना ॥ ८६ ॥

कारणके ते दोहलो संपूर्ण न थवाथी ते हालमां यमने घेर जवा जेवी थइ गइ छे, अर्थात् मरणपथारीये पडी छे. माटे तेणीनो ते दोहलो पूरीने आ वखते तमो तेणीने जीवितदान आपनारा थाओ? ॥ ८६ ॥

अवतीर्णोऽस्ति गर्भेऽस्या । राज्यार्हः कोऽपि पूरुषः ॥ ज्ञात्वेति दोहदात्तस्या-श्चाणिक्यस्तमभाषत ।८७।

आवा प्रकारना दोहलाथी खरेखर आ स्त्रीना गर्भमां कोइक राज्यने लायक पुरुष अवतरेलो छे, एम जाणीने चाणिक्ये ते नायकने कह्युं के-॥ ८७ ॥

**दोहदं पूरयाम्यस्या–श्चेदर्भं मे प्रयच्छत ॥ प्रपन्नं तेन तद्युक्त्या । जीवंती गर्भभृत्पुनः ॥ ८८ ॥**

जो मने तेणीनो ते गर्भ आपो, तो हुं तेनो दोहलो संपूर्ण करुं. त्यारे " जो आ मारी पुत्री जीवती रहेशे तो फरीने पण गर्भवंती थशे " एम युक्तिथी विचारी ते नायके पण तेम करवानुं कबूल कर्युं. ॥ ८८ ॥

**स ततः साक्षिणः कृत्वा–ऽकारयत्पटमंडपं ॥ कृत्वा तस्योपरिच्छिद्रं । ज्योत्स्ना मूर्ध्नि स्थिते विधौ ॥८९॥**

पछी चाणिक्ये तेमाटेना साक्षीओ करावीने कपडानो मंडप ( तंबू ) कराव्यो, तथा तेनी उपरे एक छिद्र रखाव्युं, के जेथी चंद्र ज्यारे मस्तकपर आवे त्यारे तेनुं तेज तेमां पडे. ॥ ८९ ॥

**अधः सुधाधिकद्रव्य–संस्कृतक्षीरपूरितं ॥ स्थालं निवेश्य संक्रांत–प्राप्तेंदु प्रतिबिंबभाक् ॥ ९० ॥**

पछी तेणे अमृतथी पण अधिक ( स्वादिष्ट ) पदार्थोनी बनावेली खीरथी भरेलो, तथा प्रतिबिंब पडवाथी अचानक रीते तेमां दाखल थयेला चंद्रवाळो थाळ ते तंबूनी मूकाव्यो. ॥ ९० ॥

**चाणिक्यस्तां सुतामूचे । त्वत्कृते पुत्रि चंद्रमाः ॥ आनीतोऽस्ति मया मंत्रै–रत्राकृष्यैष तत्पिब ॥९१॥**

पछी चाणिक्ये ते पुत्रीने कह्युं के, हे पुत्री! तारेमाटे में मंत्रोवडे खेंचीने चंद्रने अहीं आण्यो छे, माटे तेने पी जा? ।९१।

चंद्रं मत्वा च तं हर्षात्। पपौ साथ यथा यथा ॥ तथा तथोपरिच्छिद्रं। प्यधत्तोर्ध्वस्थितः पुमान्।९२।

पछी तेने चंद्र मानीने हर्षपूर्वक जेम जेम ते पीती गइ, तेम तेम तंबू उपर रहेला पुरुषे उपर रहेलुं छिद्र ढांकवा मांड्युं. ।९२।

गर्भो न्वाव्येष संपूर्णः। किं न वेति परीक्षितुं ॥ अर्धपीते स ऊचे ता–मियान् लोकार्थमस्त्विति ।९३।

हवे आ गर्भ संपूर्ण थशे के नही? एवी परीक्षा करवा माटे, ज्यारे ते अर्धभाग पी रही, त्यारे चाणिक्ये तेणीने कह्युं के, हवे आटलो तुं लोको माटे रहेवा दे? ॥ ९३ ॥

तथोक्ते नेति सोऽवादीत्। पिब पूर्णं निशाधवं ॥ लोकार्थमन्यमानिष्ये। ह्येवं श्रद्धामपूरयत्।९४।

परंतु तेम करवानी तेणीए ना पाडवाथी चाणिक्ये कह्युं के, त्यारे तुं संपूर्ण चंद्र पी जा? लोको माटे हुं बीजो चंद्र लावीश, एम कही तेणीने श्रद्धा बेसाडी. ॥ ९४ ॥

अथोत्पादयितुं द्रव्यं। सधातुविवरे ययौ ॥ धातुवादैश्च तत्प्राज्य–मुत्पाद्य पुनरागमत् ॥ ९५ ॥

पछी ते चाणिक्य धन उपार्जन करवा माटे धातुओनी खाणमां गयो, तथा त्यां धातुवादी लोको मारफते घणुं द्रव्य उपार्जन करीने पाछो त्यां आव्यो. ॥ ९५ ॥

ददर्श तत्र चाणिक्यः । सर्वदर्शनधारिणं ॥ क्रीडंतं दारकं राज–नीत्या संवसथाद्बहिः ॥ ९६ ॥

त्यारे त्यां गामनी बहार ते चाणिक्ये सर्व दर्शनोने धारण करनारा, अने राजनीतिथी क्रीडा करनारा एक बाळकने जोयो. ॥ ९६ ॥

पुरमालिख्य निःशेषं । सदःसिंहासनादिकं ॥ प्राज्यैः परिवृतं डिंभैः । सामंतादिपदे कृतैः ॥९७॥

देशादीनां वितरणं । कुर्वाणं दर्पदुर्धरं ॥ दृष्ट्वा तुष्टः स चाणिक्य–स्तं परीक्षार्थमूचिवान् ॥९८॥

राजसभा तथा सिंहासन आदिक सहित सघळुं नगर चितरीने, सामंतआदिकनी पदवीपर स्थापेला बीजा महोटा बाळकोथी घेरायेला, तथा तेओने देशआदिकानुं दान आपता, अने अत्यंत गर्विष्ट एवा ते बाळकने जोइने चाणिक्ये खुशी थइ तेनी परीक्षा करवामाटे कह्युं के, ॥ ९७ ॥ ९८ ॥

ममापि दीयतां किंचि–द्देवेत्याकर्ण्य सोऽभ्यधात् ॥ विप्रैतानि चरंति त्वं । गोकुलानि गृहाण भोः ।९९।

हे देव! मने पण कंइक आपोनी? ते सांभळी ते बाळके कह्युं के, अरे ब्राह्मण! आ गायोनां टोळां जे चरेछे, ते तुं लेइ जा? ॥ ९९

तस्माद्वैब्रान्यहं गृह्णन् । मार्ये गोस्वामिकैर्न किं ॥ स ऊचे किं न जानासि । वीरभोज्या वसुंधरा ।१००।

त्यारे ते चाणिक्ये कह्युं के, जो हुं आ गोकुलो लेउं, तो तेना मालिको शुं मने न मारी नाखे? ते सांभळी ते बाळके कह्युं के, अरे! तुं शुं एटलुं पण नथी जाणतो? के शूरवीरो तो ( आखी ) पृथ्वी भोगवी शके छे. ॥ १०० ॥

औदार्यशौर्यविज्ञानै–स्तं बालं स विदन्नपि ॥ कस्यायमिति पप्रच्छ । कंचिड्डिंभं स ऊचिवान् ॥१॥

उदारता, शूरवीरपणुं तथा विज्ञानथी ते बाळकने ओळख्या छतां पण ते चाणिक्ये बीजा कोइक बाळकने पूछ्युं के आ कोनो पुत्र छे? त्यारे ते बाळके कह्युं के, ॥ १ ॥

महत्तरस्य दौहित्र–श्चंद्रगुप्तोऽयमाख्यया ॥ गर्भस्थोऽप्येष निःशेषैः । परिव्राजकसात्कृतः ॥ २ ॥

आ अहींना नायकनी दीकरीनो दीकरो छे, अने तेनुं चंद्रगुप्त नाम छे, तथा ज्यारे ते गर्भमां हतो त्यारथीज सघळाओए तेने एक परिव्राजकने अर्पण करी दीधो छे. ॥ २ ॥

ततो हर्षेण चाणिक्य–श्चंद्रगुप्तमभाषत ॥ आगच्छागच्छ भो वत्स । यस्य त्वमसि सोऽस्म्यहं ।३।

पछी चाणिक्ये खुशी थइने चंद्रगुप्तने कह्युं के, हे वत्स! तुं आव? आव? जे परिव्राजकने तुं अर्पण करायेलो छे, ते हुं पोते छुं. ॥ ३ ॥

करोमि सत्यं राजानं । क्रीडाराज्येन किं तव ॥ इत्युक्त्वा तमुपादाय । चाणिक्यः स गतोऽन्यतः ।४।

वळी हुं तने खरेखरो राजा बनावुं, आ रमतना राज्यथी तारुं शुं वळवानुं छे? एम कही तेने लेइने ते चाणिक्य अन्य जगोए चाल्यो गयो. ॥ ४ ॥

मेलयित्वा धनैस्तैश्च । चतुरंगं महद्बलं ॥ चंद्रगुप्तं नृपं चक्रे । स्वयं मंत्री बभूव च ॥ ५ ॥

पछी ते धनवडे करीने महोटुं चतुरंगी सैन्य एकठुं करीने तेणे चंद्रगुप्तने राजा करी स्थाप्यो, अने पोते तेनो मंत्री थयो. ॥ ५ ॥

सैन्ययुक्तस्ततो गत्वा-ऽवेष्टयन्नंदपत्तनं ॥ कारागार इवारोत्सी-त्तत्र धान्यादिकं विशत् ॥६॥

पछी ते सैन्यसहित जइने तेणे ते नंदराजाना नगरने घेरो घाल्यो, तथा केदखानामां जेम, तेम ते नगरमां जतुं धान्यआदिक तेणे अटकाव्युं. ।६।

नंदोऽपि सर्वसामग्र्या । निःसृत्य नगराद्बहिः ॥ मंदराद्रिरिवांभोधिं । गाहयामास तद्बलं ॥ ७ ॥

त्यारे नंदराजा पण सर्व सामग्रीसहित नगरथी बहार निकळीने, मंदराचल जेम समुद्रने, तेम चंद्रगुप्तना सैन्यने छिन्नभिन्न करवा लाग्यो. ॥ ७ ॥

नंदसैन्याभिभूताथ । चंद्रचाणिक्ययोश्चमूः ॥ अभ्रावलीव वात्याभि-र्गता सर्वदिशोदिशं ॥ ८ ॥

हवे नंदराजाना सैन्यथी पराभव पामेली चंद्रगुप्त अने चाणिक्यनी सेना, वायुथी जेम मेघनी श्रेणि, तेम सर्व दिशाओमां

छिन्नभिन्न थइने वीखराइ गइ. ॥ ८ ॥

ततश्च चंद्रचाणिक्या-वारुह्याश्वं पलायितौ ॥ निवृत्य मेषवद्भूयः । प्रहर्तुं तौ दिशैकया ॥ ९ ॥

पछी चंद्रगुप्त तथा चाणिक्य घेटानी पेठे पाछा फरीने प्रहार करवा माटे घोडाओपर बेशीने त्यांथी एक दिशा तरफ नाशी गया. ॥ ९ ॥

मास्मोपलक्षयेत्कोऽपी-त्युज्झित्वा तुरगौ पथि ॥ आरोहतां सरःपालीं । यांतौ पादप्रचारतः ।१०।

अमोने कोइ ओळखे नही तो ठीक, एम विचारी तेओ बन्ने मार्गमां पोताना घोडाओने तजी दइने पगे चालता एक तळावनी पालपर चड्या. ॥ १० ॥

सादिनं चैकमन्वाग-छंतं दृष्ट्वा चणिप्रसूः ॥ प्रक्षालयंतं वासांसि । रजकं स्माह तीरगं ॥ ११ ॥

एवामां एक घोडेस्वारने पोतानी पाछळ आवतो जोइने चाणिक्ये किनारापर वस्त्रो धोता एवा एक धोबीने कह्युं के, ।११।

अरेरे नश्य नश्य त्वं । भग्नो नंदमहीपतिः ॥ नंदगृह्याः प्रगृह्यंते । चंद्रगुप्तस्य सादिभिः ॥ १२ ॥

अरे धोबी! तुं ( तुरत ) नाशीजा! नाशीजा! केमके नंदराजा मार्यो गयो छे, अने तेथी चंद्रगुप्तना घोडेस्वारो ते नंदराजाना पक्षकारोने पकडे छे. ॥ १२ ॥

तत् श्रुत्वा स पलायिष्ट । चाणिक्यस्तत्पदे स्थितः ॥ चंद्रगुप्तस्तु नीरांतः । स्थितः पद्मिनीवने १३

ते सांभळीने ते धोबी ( त्यांथी ), नाशी गयो, त्यारे चाणिक्य तेनी जगोए रहीने ( कपडां धोवा लाग्यो. ) तथा चंद्रगुप्त तो जलनी अंदर रहेली कमलिनीनी झाडीमां छुपाइ गयो. ॥ १३ ॥

स च सादी ततोऽवादी–चाणिक्यं रजकायितं ॥ दृष्टौ किं चंद्रचाणिक्यौ । यांतावत्रेति सोऽभ्यधात् १४

एवामां ते घोडेस्वारे ( त्यां आवी ) धोबी थइ बेठेला चाणिक्यने पूछयुं के, शुं तें अहींथी चंद्रगुप्त तथा चाणिक्यने जता जोया? त्यारे चाणिक्य बोल्यो के, ॥ १४ ॥

चाणिक्यो न मया दृष्ट–श्चंद्रगुप्तस्तु तिष्टति॥ निलीनः पद्मिनीखंडे । तापाक्रांतमरालवत् ॥ १५ ॥

चाणिक्यने तो में जोयो नथी, परंतु चंद्रगुप्त तापथी पीडायेला हंसनीपेठे आ कमलिनीनी झाडीमां छुपाइ गयेलो छे. ।१५।

दृष्ट्वा साद्यपि तं स्माह । क्षणं बिभृहि मे हयं ॥ तेनोच्यत बिभेम्यस्मा–त्तमाबध्ध्व ततस्तरौ ॥१६॥

तेने जोइने ते घोडेस्वारे चाणिक्यने कह्युं के तुं जरावार मारा आ घोडाने पकडी राख? त्यारे चाणिक्ये कह्युं के, हुं तो आ घोडाथी डरुं छुं, तेथी तेणे ते घोडाने झाड साथे बांध्यो ॥ १६ ॥

जले प्रवेष्टुं मुक्तासि–र्यावन्मुंचति पादके ॥ तावत्तस्यैव खड्गेन । चाणिक्यस्तमघातयत् ॥ १७ ॥

पछी ते घोडेस्वार पोतानी तलवार ( किनारापर ) मूकीने जलमां जवामाटे जेटलामां ( तलावमां ) पग मूके छे, तेटलामां चाणिक्ये तेनीज ते तलवारवडे तेने मारी नाख्यो. ॥ १७ ॥

**पुनर्द्वावपि तस्याश्व-मथारुह्य पलायितौ ॥ गत्वा च कियतीं भूमिं । तमपि प्रागिवोज्झतां ॥ १८ ॥**

वळी पाछा तेओ बन्ने ते स्वारना घोडापर बेशीने त्यांथी नाशवा लाग्या, तथा केटलीक भूमि ओळंगीने तेओए प्रथमनी पेठे ते घोडाने पण त्यजी दीधो. ॥ १८ ॥

**गछन्नूचे च चाणिक्य-श्चंद्रगुप्तमरे त्वया ॥ किं तदा चिंतयांचक्रे । यदादिष्टोऽसि सादिनः ॥ १९ ॥**

पछी ( मार्गे ) चालतां चाणिक्ये चंद्रगुप्तने कह्युं के, अरे! ज्यारे में तने ते घोडेस्वारने बताव्यो, त्यारे तें शुं चिंतव्युं? ।१९।

**चंद्रगुप्तोऽवदत्तात । तदैवं चिंतितं मया ॥ मम साम्राज्यमार्येण । दृष्टमिदं भविष्यति ॥ २० ॥**

चंद्रगुप्ते कह्युं के, हे तात! ते वखते में एम चिंतव्युं के, एवी रीते मने राज्य मळवानुं आपना ध्यानमां बेठुं हशे. ॥२०॥

**तं निश्चिक्येऽथ चाणिक्यो । न मे व्यभिचरत्यसौ ॥ मदुक्तमस्यानुल्लंघ्यं । शिष्यस्य गुरुवाक्यवत् ॥ २१ ॥**

हवे चाणिक्ये तेना संबंधमां निश्चय कर्यो के, आ चंद्रगुप्त मारा मते विश्वासविनानो नथी, केमके गुरुना वाक्यने जेम शिष्य, तेम मारुं वचन ते उल्लंघतो नथी. ॥ २१ ॥

अथ क्षुधार्त्तं संस्थाय । चंद्रगुप्तं वनांतरे ॥ चाणिक्यः प्राविशत्कंचिद् । ग्राममन्नाय तत्कृते ॥ २२ ॥

पछी क्षुधातुर थयेला चंद्रगुप्तने वनमां मूकीने चाणिक्य तेनामाटे भोजन लाववा सारु कोइक गाममां गयो. ॥ २२ ॥

तिलकैष्टीकमानांगं । नासालग्नमहोदरं ॥ दृष्ट्वैकं विप्रमायांतं । चाणिक्यः पृच्छतिस्म तं ॥ २३ ॥

एवामां तिलकोवडे शोभता शरीरवाळा, तथा नाशिकाने अडी गएलुं छे उदर जेनुं एवा एक ब्राह्मणने आवतो जोइने चाणिक्ये तेने पूछयुं के-॥ २३ ॥

भोजनं लभ्यते क्वापि । सोऽवदल्लभ्यते भृशं ॥ एकस्य यजमानस्य । गेहेऽद्यास्ति महोत्सवः ॥ २४ ॥

अहीं क्यांय भोजन मळे छे? त्यारे ते ब्राह्मणे कह्युं के घणुं मळे छे, केमके आजे एक यजमानने घेर महोत्सव छे. ॥२४॥

सोऽपर्वाणां विशेषेण । दत्ते दधिकरंबकं ॥ भुंक्ष्व त्वमपि भुक्त्वाह-मप्यायातस्ततोऽधुना ॥ २५ ॥

वळी ते यजमान अतिथिओने विशेष प्रकारे दहींनो करंबो आपे छे, माटे तुं पण ( त्यां जइ ) जमी आव? हुं पण त्यांथी हमणांज जमीने आव्यो छुं. ॥ २५ ॥

माज्ञासीदत्र मां कोऽपि । प्रविष्टं नंदपूरुषः ॥ मांविना चंद्रगुप्तं च । कोऽपि मास्मग्रहीद्बहिः ॥ २६ ॥

( ते सांभळी ) चाणिक्ये विचार्युं के, नंदराजानो कोइ माणस मने आ गाममां दाखल थयेलो न जाणे तो ठीक, तेमज मारा विना ( वनमां ) बहार रहेला चंद्रगुप्तने पण कोइ पकडी न जाय तो ठीक. ॥ २६ ॥

नंदाश्ववारैर्दुर्वारैः । स चेदात्तः कथंचन ॥ ततः सर्वस्वमोषान्मे । छिन्ना राज्यस्पृहालता ॥ २७ ॥

वळी अटकावी न शकाय एवा नंदराजाना स्वारोए कोइ पण प्रकारथी जो ते चंद्रगुप्तने पकड्यो, तो पछी मारुं सर्व कंइं लुंटाइ जवाथी मारी राज्यनी इच्छा नाशज पामशे. ॥ २७ ॥

एवं विचिंत्य रक्षोव–न्निःकृपः क्षुरिकाकरः ॥ तस्योदरं विदार्याशु । चाणिक्यः पद्मकोवशात् ॥ २८ ॥

अविनष्टं स्वरूपस्थं । स्थाल्या इव करंबकं ॥ तमादाय पुटे कृत्वा । गत्वा मौर्यमभोजयत् ॥ २९ ॥

एम विचारीने राक्षसनी पेठे निर्दय, तथा हाथमां छरीवाळा एवा ते चाणिक्ये कमळना डोडानी पेठे तुरत ते ब्राह्मणनुं उदर चीरी नाखीने, नही बगडेला तथा जेमनेतेम रहेला एवा ते करंबाने थाळीमांथी जेम, तेम तेना पेटमांथी कहाडी लेइने, तथा एक पडीयामां भरीने, त्यांथी चालीने चंद्रगुप्तने ( ते वडे ) जमाड्यो. ॥ २८ ॥ २९ ॥

पुनर्यातौ गतौ क्वापि । संनिवेशे निशामुखे ॥ चाणिक्यस्तत्र भिक्षार्थी । वृद्धाभीरीगृहं गतः ॥ ३० ॥

पछी त्यांथी चालता तेओ बन्ने संध्याकाळे कोइक सन्निवेशमां ( रबारीओना नेसमां ) पहोंच्या, तथा त्यां चाणिक्य भिक्षामाटे कोईक वृद्ध रबारणने घेर गयो. ॥ ३० ॥

अत्रांतरे स्वडिंभानां । रब्बात्युष्णा तया तदा ॥ स्थाले दत्तास्ति तन्मध्ये । व्यधादेकः शिशुः करं ॥३१॥

एवामां ते वखते ते रबारणे पोताना बाळकोने ( जमवा माटे ) थाळीमां अत्यंत उष्ण राब पीरसी हती, ते उष्ण राबमां एक बाळके पोतानो हाथ नाख्यो. ॥ ३१ ॥

रुदन् दग्धकरःसोऽथ । तया साक्रोशमौच्यत ॥ किं चाणिक्यस्य निर्बुद्धे-र्मिलितोऽसि त्वमप्यरे ॥ ३२ ॥

त्यारे हाथ दाझवाथी ते बाळक रडवा लाग्यो, एटले ते रबारणे गुस्से थइ तेने कह्युं के, अरे! तुं पण बुद्धि रहित एवा चाणिक्यजेवोज जणाय छे? ॥ ३२ ॥

स्वनामाशंकयापृच्छ-च्चाणिक्यः स्थविरां ततः ॥ मातः क एष चाणिक्य-स्त्वं यदीयोपमामदाः ॥ ३३ ॥

हवे पोतानुं नाम सांभळी शंका पडवाथी चाणिक्ये ते डोशीने पूछयुं के, हे माताजी ! तें जेनी उपमा आपी, ते चाणिक्य कोण छे? ॥ ३३ ॥

तयोक्तं कोऽपि चाणिक्य-श्चंद्रगुप्तनृपान्वितः ॥ प्रागेव पाटलिपुत्र-मुपादातुमढौकत ॥ ३४ ॥

त्यारे तेणीए कह्युं के, कोइक चाणिक्य नामनो माणस चंद्रगुप्त राजाने साथे लेइने प्रथमज पाटलीपुत्र स्वाधीन करवाने आव्यो. ॥ ३४ ॥

मूर्खो न वेत्ति यद्देशो । गृह्यते प्राक् समंततः ॥ गृहीते च ततस्तस्मि-न्नात्तमेव हि पत्तनं ॥ ३५ ॥

ते मूर्ख चाणिक्ये एम न विचार्यु के प्रथम आसपासनो देश स्वाधीन कराय, अने एवीरीते आसपासनो देश लेवाथी राजधानी तो स्वाधीनज थइ जाय. ॥ ३५ ॥

मत्पुत्रोऽप्येष तत्तुल्य,ः पूर्वमेवाद्दिपत्करं ॥ मध्ये योऽत्युष्णरब्बाया। अनादायैव पार्श्वतः ॥ ३६ ॥

ते चाणिक्य जेवा मारा आ पुत्रे पण प्रथमथीज पडखे पडखे लीधाविना अति उष्ण राबनी वच्चेज हाथ नाख्यो. ॥३६॥

बालादपि हितं ग्राह्य-मिति नीतिं स्मरंस्ततः ॥ सनंदराज्यसंप्राप्ति-लग्नकं तद्वचोऽग्रहीत् ॥ ३७ ॥

( ते सांभळी ) बालक पासेथी पण हितकारी वचन ग्रहण करवुं, एवी नीतिने याद करता एवा ते चाणिक्ये नंदराजानुं राज्य मेळववा माटे लग्न सरखां ते रबारणना वचनने तेणे ग्रहण कर्युं. ॥ ३७ ॥

सचंद्रगुप्तश्चाणिक्यः। संवर्ग्य बलमात्मनः ॥ गच्छतिस्म ततः शैलं। हिमवत्कूटनामकं ॥ ३८ ॥

पछी ते चाणिक्य चंद्रगुप्त सहित पोतानुं सैन्य एकठुं करीने हिमवंत नामना पर्वतपर गयो. ॥ ३८ ॥

शबराधिपतिं तत्र। चाणिक्यः पर्वताभिधं ॥ साहायकं ततः कांक्ष-न्नयतिस्म वयस्यतां ॥ ३९ ॥

त्यां पर्वत नामना भिल्लोना नायकने पोताना मददगार तरीके इच्छता एवा ते चाणिक्ये तेने मित्र करी लीधो. । ३९ ।

तमन्यदोचे चाणिक्यो। नंदमुन्मूल्य तच्छ्रियं ॥ आवां विभज्य गृह्णीव। सोऽपि तत्प्रत्यपद्यत ॥ ४० ॥

॥ ३३ ॥

पछी एक वखते चाणिक्ये ते पर्वतने कह्युं के, नंदराजाने जडमूळथी उखेडी नाखीने तेनी लक्ष्मीने आपण बन्ने वहेंची लेइए, त्यारे तेणे पण ते स्वीकार्युं ॥ ४० ॥

सर्वौघेणाथ चाणिक्यः । स्वीकुर्वन्नंदमेदिनीं ॥ एकं नंदपुरं स्फीतं । वेष्टयामास सर्वतः ॥ ४१ ॥

पछी चाणिक्ये सर्व सैन्य सहित नंदराजानी भूमिने स्वाधीन करतांथकां ते नंदराजानां एक जाहोजलालीवाळां नगरने चोतरफथी घेरो घाल्यो. ॥ ४१ ॥

शक्नोति तन्न चादातुं । परिव्राड्वेषभाक् ततः ॥ चाणिक्यः प्रविवेशांतः—पुरं तद्वास्तु वीक्षितुं ॥ ४२ ॥

परंतु ते नगरने ते स्वाधीन करी शक्यो नही, त्यारे चाणिक्य परिव्राजकनो वेष लेइने ते नगरनुं वास्तुस्थान जोवा माटे नगरनी अंदर दाखल थयो. ॥ ४२ ॥

अपश्यत् सुप्रतिष्टाः स । भ्रमन्निंद्रकुमारिकाः ॥ दध्यौ चैतत्प्रभावेणा—ऽभंगमेतत्पुरं ध्रुवं ॥ ४३ ॥

त्यां भमतांथकां तेणे सारीरीते प्रतिष्टित थयेली देवीओनी मूर्त्तिओ जोइ, त्यारे तेणे विचार्युं के खरेखर आ प्रतिष्ठित मूर्तिओना प्रभावथी आ नगर न भांगी शकाय तेवुं छे. ॥ ४३ ॥

वर्णीत्युद्वेषमापृष्टः । स निर्विण्णैर्जनैस्तदा ॥ आख्यदिंद्रकुमारीणा—मासामुत्पाटने सति ॥ ४४ ॥

आ कोइक लिंगी छे, एम विचारी कंटाळी गयेला लोकोए ते वखते तेने पूछयुं के, आ नगरनो घेरो क्यारे जशे? त्यारे चाणिक्ये कह्युं के, आ देवीओनी मूर्त्तिओनुं उत्थापन करवाथी घेरो चाल्यो जशे. ॥ ४४ ॥

मयैतल्लक्षणैर्ज्ञातं । प्रत्ययश्चैष कथ्यते ॥ एतदुत्पाटनारंभे-ऽपीषद्रोधनिवर्तनं ॥ ४५ ॥

वळी में आ हकीकत लक्षणथी जाणी छे, अने तेमाटेनी खातरीक हुं छुं के आ मूर्त्तिओने उत्थापन करवानो प्रारंभ करतांज थोडो घेरो तो दूर थशे. ॥ ४५ ॥

तत्रारब्धेऽपि तैस्तेन । रोधः किंचिद्व्यवर्तत ॥ ततः प्रत्ययितैर्लोकै-स्तत्र कूपः कृतस्तदा ॥ ४६ ॥

पछी लोकोए ते मूर्त्तिओने उत्थापन करवानुं कार्य प्रारंभ्युं के तुरत थोडो घेरो पाछो हठी गयो, अने तेथी प्रतीति आववाथी लोकोए त्यां ते वखते कूवो करी नाख्यो, अर्थात् ते मूर्तिओने जडमूळथी उखेडी नाखीने कूवाजेवो खाडो करी नाख्यो. ।४६।

ततस्तन्नगरं तत्र । गृहीत्वा भूरिवैभवं ॥ सर्वां परिधिमादाय । पाटलीपुत्रमाययौ ॥ ४७ ॥

पछी चाणिक्य त्यां घणा वैभववाळुं ते नगर स्वाधीन करीने, तथा आसपासनो सघळो प्रदेश लेइने पाटलीपुत्रमां आव्यो. ४७

ततस्तच्चंद्रगुप्तस्य । पर्वकस्य च सैनिकैः ॥ वेष्टितं सर्वतो दत्त-पोतावेष्टमिवाभवत् ॥ ४८ ॥ 

पछी ते नगरने चंद्रगुप्त तथा पर्वतना लश्करीओए चोतरफथी घेरी लीधुं, अने तेथी जाणे तेने फरतो वस्त्रनो पाटो बांध्यो होय नहीं? एवुं ते थयुं. ॥ ४८ ॥

दर्पान्नंदोऽपि निर्गत्य । निर्गत्य प्रतिवासरं ॥ मद्दारणं प्रकुर्वाणः । क्षीयतेस्म त्रुटद्दलः ॥ ४९ ॥

अभिमानथी नंदराजा पण हमेशां ( नगरथी बहार ) निकळी निकळीने महोटुं युद्ध करवा लाग्यो, अने तेथी लश्करनो नाश थवाथीते निर्बळ थइ गयो. ॥ ४९ ॥

धर्मद्वारं ययाचेऽथ । हंतकारमिव द्विजः ॥ चाणिक्यस्तद्ददौ तस्मै । नीतिरेषा हि भूभुजां ॥ ५० ॥

पछी हत्या करनारप्रते जेम ब्राह्मण, तेम ते नंदराजाए धर्मद्वार एटले जीवितदान माग्युं, त्यारे चाणिक्ये पण तेने ते आप्युं, केमके राजाओनी ए नीति छे. ॥ ५० ॥

उपालंभश्च नंदस्य । चाणिक्येन प्रदापितः ॥ त्वया न किंचिन्मे दत्त-मर्धचंद्रंविना तदा ॥ ५१ ॥

पछी चाणिक्ये नंदराजाने उपालंभ ( मेणुं ) अपाव्यो के, तें तो मने ते वखते गरदन पकडीने बहार कहाडवा शिवाय कंइ आप्युं नहोतु. ॥ ५१ ॥

दत्तं मयाधुना ते तु । जीवितं नंद नंद तत् ॥ रथेनैकेन यन्नाति । तदादाय च निःसर ॥ ५२ ॥

अने हे नंद! में तो तने आ वखते जीवितदान आप्युं छे, माटे हवे खुशी था? तथा एक रथमां तारी मरजी पडे ते लइने अहींथी निकळी जा? ॥ ५२ ॥

नंदो विषादमापन्नः । प्रक्षीणबलविक्रमः ॥ दध्यौ धिग् धिग् श्रियं पापां । चपलां चपलामिव ॥ ५३ ॥

हवे बळ तथा पराक्रम क्षीण थवाथी खेद पामेलो नंदराजा विचारवा लाग्यो के, अरे ! विजळीनी पेठे चंचल एवी पापयुक्त लक्ष्मीने धिक्कार थाओ ? ॥ ५३ ॥

अथ नंदः कलत्रे द्वे । पुत्रीमेकां च वल्लभां ॥ तथा साराणिसाराणि । रथे रत्नान्यतिष्टपत् ॥ ५४ ॥

पछी ते नंदराजाए पोतानी बे स्त्रीओने, तथा एक वहाली पुत्रीने, अने सारां सारां रत्नोने रथमां भर्यां. ॥ ५४ ॥

विषकन्यां पुनः पात्र-भूतामेकां गृहेऽमुचत् ॥ चंद्रगुप्तो विवाह्यैतां । म्रियतामिति चिंतया ॥ ५५ ॥

आनीसाथे परणीने चंद्रगुप्त भले मरे, एवा विचारथी ते नंदराजाए एक उमरलायक विषकन्याने ( त्यां पोताना ) घरमां राखी. ॥ ५५ ॥

सुवर्णरत्नमाणिक्य-वस्त्रकुप्यादिकं पुनः ॥ द्विषां किमपि नून्मेति । दत्वा सर्वं चचाल सः ॥ ५६ ॥

पछी सुवर्ण, रत्न, माणिक्य, वस्त्र तथा धातुओनां वासणआदिक कंइ पण शत्रुना हाथमां न जाय, एम विचारी ते सर्वनुं दान आपीने ते त्यांथी चालतो थयो. ॥ ५६ ॥

चंद्रगुप्तं विशंतं च । निर्यन्नंदप्रियात्मजा ॥ दृष्ट्वोन्नतं सूर्यमिव । विचकासाब्जिनीव सा ॥ ५७ ॥

हवे बहार निकळता नंदराजानी प्रियपुत्री, उगेला सूर्यने जोइने जेम कमलिनी तेम, चंद्रगुप्तने नगरमां दाखल थतो जोइने आनंद पामवा लागी. ॥ ५७ ॥

ततस्तामूचिवान्नंदः । पापे पश्यसि वैरिणं ॥ मम राज्यहरे रक्ता । तद्याहि भज वल्लभं ॥ ५८ ॥

त्यारे तेणीने नंदराजाए कह्युं के, अरे! पापणी! तुं मारा वैरीतरफ जुए छे! मारुं राज्य हरण करनारपर ज्यारे तुं आसक्त थइ छे, तो चालीजा? अने ते तारा वल्लभने भज ? ॥ ५८ ॥

ततश्चंद्ररथारोहे । तस्यास्त्यक्त्वा रथं पितुः ॥ नंदलक्ष्म्या इवाजारा-न्भग्नाश्चक्रारका नव ॥ ५९ ॥

पछी ज्यारे ते पोताना पितानो रथ छोडीने चंद्रगुप्तना रथपर चडवा लागी त्यारे, साक्षात् नंदनी लक्ष्मी सरखी एवी तेणीना चोतरफना भारथी होय नहि? तेम चंद्रगुप्तना रथना चक्रना नव पांखडां भांगी गयां. ॥ ५९ ॥

मन्वानोऽशकुनं चंद्र-गुप्तस्तां विनिवारयन् ॥ चाणिक्येनोच्यतासौ ते । शकुनस्तन्निषेध मा ॥ ६० ॥

ते वखते तेने अपशुकन मानीने चंद्रगुप्त तेणीने ( रथपर चडती ) अटकाववा लाग्यो, त्यारे चाणिक्ये चंद्रगुप्तने कह्युं के, आतो तने शुभ शुकन छे, माटे तेने अटकाव नहीं. ॥ ६० ॥

नवारकं नवद्राज्य-मितो भावि नवान्वयं ॥ ततस्तां रथमारोप्य । चंद्रगुप्तोऽविशत्पुरं ॥ ६१ ॥

आजथी मांडीने तारुं राज्य नव पहेडी सुधी शत्रु रहित निष्कंटक चालशे, पछी चंद्रगुप्त तेणीने रथमां बेसाडीने नगरमां दाखल थयो. ॥ ६१ ॥

**नंद पूर्णा प्रतिज्ञा मे। पश्येयं छोट्यते शिखा ॥ इत्युक्त्वा पश्यतस्तस्य। चाणिक्योऽछोटयच्छिखां ॥ ६२ ॥**

( पछी चाणिक्ये नंदने कह्युं के ) हे नंद! हवे मारी प्रतिज्ञा पूर्ण थइ छे, अने तेथी जो आ मारी चोटली हुं छोडुं छुं, एम कही तेना देखतांज चाणिक्ये पोतानी चोटली छोडी नाखी. ॥ ६२ ॥

**गच्छतिस्म बहिर्नंद–स्ते तु नंदगृहं गताः ॥ दृष्ट्वा कन्यां च तां चंद्र–पर्वतावन्वरज्यतां ॥ ६३ ॥**

पछी ते नंदराजा बहार निकळी गयो, अने ( चंद्रगुप्त आदिक ) तेओ सघला नंदने घेर गया, त्यां ते विषकन्याने जोइने चंद्रगुप्त तथा पर्वत बन्ने तेपर मोही पड्या. ॥ ६३ ॥

**चाणिक्यो विषकन्यां तां। ज्ञात्वा चिह्नैस्ततोऽवदत् ॥ चंद्रगुप्त तवैकाभूत्। पर्वतस्यास्त्वसौ पुनः ॥ ६४ ॥**

त्यारे चाणिक्ये तेणीने लक्षणोथी विषकन्या जाणीने कह्युं के, हे चंद्रगुप्त! एक कन्या तने मळी गइ छे, माटे हवे आ कन्या पर्वतने मळवी जोइए. ॥ ६४ ॥

**युवराज्यां नंदसाम्राज्यं। ग्राह्यं सर्वं विभज्य तत् ॥ प्रारेभे पर्वतोद्वाह–स्तदैवाथ तया सह ॥ ६५ ॥**

केमके तमारे बन्नेए नंदनुं सघळुं राज्य सरखे भागे वहेंची लेवानुं छे. पछी ते कन्यासाथे तेज वखते पर्वतनो वीवाह करवा मांड्यो. ॥ ६५ ॥

**तत्र मंगलतूर्याणि । प्रणदंतिस्म विस्वरं ॥ ज्वलनो वेदिकांतश्च । संहारशिखयाज्वलत् ॥ ६६ ॥**

ते वखते त्यां विपरीत स्वरवडे वाजित्रो वागवां लाग्यां, तथा वेदीमां प्रगटावेलो अग्नि पण संहारकारक ज्वालाथी बळवा लाग्यो. ॥ ६६ ॥

**लाजांजलीश्च दैवज्ञो । जुहोतिस्म स्खलन् स्खलन् ॥ सुशोधितेऽपि लग्नेऽभू–द्भौमो नीचस्तनस्तदा ॥६७॥**

वळी ते वखते ज्योतिषी पण स्खलना पामतोथको (ते अग्निमां) चोखानी अंजलीओ होमवा लाग्यो, तथा लग्नने सारी रीते शोध्या छतां पण ते वखते मंगळ विशेष नीचो रह्यो. ॥ ६७ ॥

**लग्ने च लग्नवेलायां । सर्पवत्कन्यकाकरे ॥ मूर्छितः शबराधीशो । विषावेगेन तत्क्षणात् ॥ ६८ ॥**

पछी लग्नवखते सर्पखरखी ते कन्यानो हाथ झालवाथी भिल्लोनो अधिपति ते पर्वतराजा तेज क्षणे झेर चडवाथी मूर्छा पाम्यो । ६८ ।

**त्रातस्त्रातश्चंद्रगुप्त । तात चाणिक्य धीसख ॥ म्रियते म्रियते रक्ष–रक्षेत्यार्त्तो जजल्प सः ॥ ६९ ॥**

पछी ते पर्वत हे भाइ! हे भाइ! चंद्रगुप्त! हे बुद्धिमान् पिताजी चाणिक्य! हुं मरी जाउं छुं, हुं मरी जाउं छुं, मने बचावो ! बचावो ! एम पीडा पामतोथको बोलवा लाग्यो ॥६९ ॥

चंद्रगुप्तः प्रतीकारं । यावदारभतेऽस्य तु ॥ तावद्भ्रूकुटिमाबध्य । चाणिक्यस्तं न्यवारयत् ॥ ७० ॥

पछी चंद्रगुप्त जेवामां तेनो इलाज करवा जाय छे, तेवामां चाणिक्ये भमर चडावीने तेने अटकाव्यो ॥ ७० ॥

ऊचे चाद्यापि मुग्धोऽसि । नीतिं वेत्सि न भूपते ॥ अर्धराज्यहरं मित्रं । यो न हन्यात्स हन्यते ॥ ७१ ॥

अने कह्युं के, अरे! हजु पण तुं भोळो देखायछे! राजनीतिने जाणतो नथी, राज्यमांथी अर्धो भाग पडावनारा मित्रने जे मारे नही, तेनो विनाश थाय छे. ॥ ७१ ॥

कालक्षेपं ततः सोऽपि । चक्रे व्यावर्तनादिभिः ॥ अत्राणस्त्रुटितप्राण—स्ततः पर्वतको मृतः ॥ ७२ ॥

पछी ते चंद्रगुप्ते पण जवा आववादिकथी वखत कहाडी नाख्यो, अने तेथी सहायविनानो पर्वत प्राण निकळी जवाथी मृत्यु पाम्यो. ॥ ७२ ॥

ततो राज्यद्वयेऽप्यासी—चंद्रगुप्तः क्षितीश्वरः ॥ चाणिक्यश्च महामंत्री । राज्यनाटकसूत्रभृत् ॥ ७३ ॥

पछी ते बन्ने राज्योनो चंद्रगुप्त राजा थयो, अने ते राज्यरूपी नाटकना सूत्रधार सरखो चाणिक्य तेनो महामंत्री थयो. ७३

तदा नवचराज्ञत्वा—त्तत्र नंदस्य पूरुषाः ॥ सर्वतः कुर्वते चौर्यं । दुर्धराः सिद्धविद्यवत् ॥ ७४ ॥

हवे ते वखते नवा चोकीदारो अजाण्या होवाथी नंदराजाना माणसो विद्यासिद्ध पुरुषोनी पेठे पकडाया विना चोतरफ चोरी करवा लाग्या. ॥ ७४ ॥

तद्रक्षार्थं तलारक्ष-मीक्षमाणस्ततः पुरे ॥ वेषांतरेण चाणिक्यः । सर्वत्रापि परिभ्रमन् ॥ ७५ ॥

तेथी लोकोना रक्षण माटे कोइक कोटवाळनी शोध करतो थको चाणिक्य वेश बदलीने नगरमां सर्व जगोए फरवा लाग्यो. ७५

कुविंदं नलदामाख्यं । वयंतं क्वाप्यवैक्षत ॥ रममाणः सुतस्तस्य । दष्टो मर्कोटकैस्तदा ॥ ७६ ॥

एवामां कोइक जगोए तेणे नलदाम नामना साळवीने ( कापड ) वणतो जोयो, ते वखते रमता एवा तेना पुत्रने मकोडाओ करड्या. ॥ ७६ ॥

रटन्नागत्य तस्याख्य-त्तेनाथ यमबंधुना ॥ खनित्वा तद्बिलं सद्य-स्ते सर्वे भस्मसात्कृताः ॥ ७७ ॥

तेथी तेणे रडतां थकां ते हकीकत पोताना ते बापने जणावी, तेथी यमना भाइ सरखा निर्दय एवा ते वणकरे ते मकोडाओनुं दर खोदीने सर्व मकोडाओने बाळी नाख्या. ॥ ७७ ॥

चाणिक्योऽपि हि योग्योऽय-मिति मत्वा गृहं गतः ॥ तमाहूय तलारक्षं । चक्रे निस्त्रिंशशेखरं ॥७८॥

( ते जोइ ) चाणिक्ये विचार्युं के, खरेखर आ वणकर योग्य छे, एम विचारी घेर जइ ते निर्दयशिरोमणी वणकरने बोलावीने तेणे कोटवाल कर्यो. ॥ ७८ ॥

तेनोक्तास्तस्कराः स्तैन्यं । कुरुत स्वेच्छयाधुना ॥ जाते मयि तलारक्षे । समस्तं राज्यमात्मनः ॥७९॥

पछी ते वणकरे सर्व चोरोने जाहेर कर्युं के, हवे तमो ( निर्भयपणे ) मरजी मुजब चोरी करो? केमके हुं कोटवाळ होवाथी आखुं राज्य आपणुं छे. ॥ ७९ ॥

इति विश्वास्य ते सर्वे। निमंत्र्य सकुटुंबकाः ॥ द्वारं पिधाय भुंजानाः ॥ कृताः प्रज्वाल्य भस्मसात्। ८०।

एवी रीते तेओ सर्वने विश्वासमां लेइने कुटुंब सहित ( भोजन माटे ) नोतर्या, पछी भोजन करता एवा तेओ सर्वने दरवाजो बंध करी बाळीने खाख करी नाख्या. ॥ ८० ॥

ततः सौस्थ्यं पुरे तत्र। तथा जज्ञे यथा क्वचित् ॥ चौरैः सहैव दग्धत्वा–चौर्यनाम्नोऽपि न श्रुतिः ॥ ८१ ॥

पछी ते नगरमां एवी तो शांति फेलाइ गइ के, ते चोरोनी साथेज चोरीनुं नाम पण बळी जवाथी कोइ जगोए संभळातुं नहोतुं ॥ ८१ ॥

अथैकत्र पुरा ग्रामे। लब्धो भिक्षालवोऽपि न ॥ चाणिक्येन ततस्तत्र। क्रुद्धादेशो व्यसृज्यत ॥ ८२ ॥

हवे पूर्वे कोइएक गाममां चाणिक्यने लेशमात्र पण भिक्षा मळी नहोती, तेथी त्यांना लोकोपर एक एवो ( द्विअर्थी ) अयोग्य हुकम मोकल्यो के, ॥ ८२ ॥

यथा चूताश्च वंशाश्च। मार्गे तिष्टंति वस्ततः ॥ छित्वा चूतवनं वंश–वनस्य क्रियतां वृतिः ॥ ८३ ॥

तमारा ( गामना ) मार्गमां आंबा तथा वांसो छे, माटे आंबाना वनने छेदीने वांसना वननी वाड करजो? ॥ ८३ ॥

दध्युर्ग्रामेयकास्तेऽथ । न चूतैर्वंशरक्षणं ॥ घटतो किंतु वंशौघै-श्चूतानां परिरक्षणं ॥ ८४ ॥

त्यारे गामडीआओ विचारवा लाग्या के, आंबाओ वडे करीने वांसनुं रक्षण घटे नही, परंतु वांसोना समूहोवडे आंबाओ-नुं रक्षण घटी शके. ॥ ८४ ॥

परमार्थमजानानैः । स्वबुद्ध्येति विमृश्य तैः ॥ छित्वा वंशांस्ततश्चूत-वनस्य वृत्तिराद्धे ॥ ८५ ॥

परमार्थने नही जाणता एवा ते गामडीआओए पोतानी बुद्धिथी विचारीने वांसोने छेदीने तेओवडे आंबाना वननी वाड करी. ॥ ८५ ॥

तमादेशविपर्यासं । मिषीकृत्य चणिप्रसूः ॥ मदांध इव कुंभींद्रः । कृत्याकृत्यमचिंतयन् ॥ ८६ ॥

सबालवृद्धं तं ग्रामं । बध्ध्वा द्वाराणि सर्वतः ॥ द्वीपायनो द्वारवती-मिव प्राज्वालयत्क्रुधा ।८७।

एवी रीते विपरीत हुकमनो मिष करीने चाणिक्ये मदोन्मत्त हाथीनीपेठे कार्य अकार्यनो विचार कर्याविना गामना सर्व दरवाजा बंध करीने द्वीपायने जेम द्वारिकाने, तेम बाळकथी मांडी वृद्धपर्यंत ते गामने क्रोधथी बाळी नाख्युं. । ८६ । ८७।

अथानिनाय तां नार्या-मूचे च दयिते मया ॥ त्वत्कृते विहितः सर्वः । साम्राज्यार्थमुपक्रमः ।८८।

त्यारबाद पोतानी ते स्त्रीने तेडावीने कह्युं के, हे प्रिये! में तारेमाटे आ सघळो राज्यादिक मेळववानो श्रम कर्यो छे. ८८.

अपमानविषार्तिं ता–मैश्वर्यसुधयाधुना ॥ तन्निवर्त्य महाभागे । सर्वतोऽनुभवेः सुखं ॥ ८९ ॥

माटे हे महाभाग्यवाळी! ( ते समयनी ) तारी अपमानरूपी झेरनी पीडाने हवे वैभवरूपी अमृतथी दूर करीने सर्व प्रकारनां सुख भोगव? ॥ ८९ ॥

चाणिक्यचरितं चैत–दाकर्ण्य श्वशुरोऽपि हि ॥ भीतभीतः समागत्य । चाणिक्यमिदमूचिवान् ॥९०॥

हवे आवी रीतनुं चाणिक्यनुं वृत्तांत सांभलीने तेनो ससरो पण अतिशय भय पामीने चाणिक्यपासे आवीने कहेवा लाग्यो के–॥ ९० ॥

जामातः प्राग्यदस्माभिः । पुत्रोद्वाहे भवत्प्रिया ॥ दयिता निर्धनस्येति । स्वपुत्र्यपि न सत्कृता ॥ ९१ ॥

हे जमाइ! पूर्वे अमारा पुत्रना विवाह वखते तमारी स्त्रीने, आ निर्धननी स्त्री छे, एम जाणीने पोतानी पुत्रीनो पण अमोए जे सत्कार कर्यो नथी, ॥ ९१ ॥

स तवैव तिरस्कार–स्तत्वतोऽस्माभिरादधे ॥ क्षम्यतामेकदास्माक–मपराधः प्रसद्य नः ॥ ९२ ॥

ते तत्वथी अमोए तमारोज तिरस्कार कर्यो छे, माटे अमारो ते अपराध अमारापर कृपा करीने एक वखतने माटे तमो माफ करो? ॥ ९२ ॥

चाणिक्योऽप्यनवत्तस्य । सुप्रसन्नमनास्ततः ॥ जायंते हि महीयांसः । प्रणिपाते वशंवदाः ॥ ९३ ॥

( ते सांभळी ) चाणिक्य पण तेनापर प्रसन्न मनवाळो थयो, कारणके महान् पुरुषो नमेलापर खुशी थाय छे. ॥ ९३ ॥

श्वशुरस्यापरेषां च । स्वजनानां ततस्तदा ॥ स ददौ ग्रामदेशादी-दौचित्यादौचितीचणः ॥ ९४ ॥

पछी ते वखते अवसरने ओळखनारा ते चाणिक्ये पोताना ससराने, तथा बीजा संबंधीओने योग्यता मुजब गाम तथा देश आदिक आप्यां. ॥ ९४ ॥

अन्यदालोकयत्कोशं । शून्यं दुर्गतवेश्मवत् ॥ दध्यौ ततोऽसिवद्राज्यं । कोशहीनं विनंक्ष्यति ॥ ९५ ॥

हवे एक वखते तेणे दरिद्रीना घरनी पेठे ( राज्यनो ) भंडार खाली जोयो, तेथी तेणे विचार्युं के कोश एटले द्रव्यना भंडार विना ( पक्षे-मियान विना ) तलवारनी पेठे राज्य नष्ट थाय छे. ॥ ९५ ॥

अथ कोशकृतेऽकार्षी-च्चाणिक्यः कूटपाशकान् ॥ रत्नस्थालं पुरस्कृत्य । स्वं नरं रंतुमासयत् ॥ ९६ ॥

हवे ते चाणिक्ये द्रव्यथी भंडार भरवा माटे खोटा पाशाओ कराव्या, अने रत्नोनो भरेलो स्थाळ आगळ राखीने पोताना एक माणसने ( जुगार ) रमवा बेसाड्यो. ॥ ९६ ॥

सोऽवदद्येन जीयेऽहं । रत्नस्थालस्य स प्रभुः ॥ दद्यादेकं स दीनारं । यः पुनर्जीयते मया ॥ ९७ ॥

ते रमनार माणसे जाहेर कर्युं के, जे मने जीती जाय, ते आ रत्नोना स्थालनो मालीक थाय, अने जेने हुं जीतुं तेणे फक्त मने एक सोनामोहोर आपवी. ॥ ९७ ॥

**रमंते बहवस्तेन । सार्धं लोभेन किं पुनः ॥ जीयते स न केनापि । स्ववशंवदपाशकः ॥ ९८ ॥**

लोभना मार्या घणा माणसो तेनी साथे रमे छे, परंतु वशमां छे पाशाओ जेना एवा ते चाणिक्यना माणसने कोइ पण जीती शकतुं नथी. ॥ ९८ ॥

**चाणिक्येनाथ विज्ञाय । कोशपूर्तिश्चिरादितः ॥ उपायांतरमासूत्रि । शीघ्रकोशप्रदं ततः ॥ ९९ ॥**

आ उपायथी तो घणे काळे भंडार भराय, एम जाणीने जल्दी भंडार द्रव्यथी भराय, एवो बीजो उपाय तेणे शोधी कहाड्यो. ॥ ९९ ॥

**पाययामि यथा मद्यं । सर्वानपि कुटुंबिनः ॥ गृहसारं निजं येन । सर्वमावेदयंति ते ॥ २०० ॥**

हवे ( नंदराजाना ) सघळा कुटुंबिओने मदिरा पीवरावुं, के जेथी तेओ पोतपोताना घरनी सर्व मिल्कत ( बेभानपणामां ) प्रगट करी दीए. ॥ २०० ॥

**यतः क्रुद्धस्य रक्तस्य । व्यसनापतितस्य च ॥ मत्तस्य म्रियमाणस्य । सद्भावः प्रकटो भवेत् ॥ १ ॥**

केमके क्रोधीनो, आसक्तनो, दुःखमां पडेलानो, बेभान थयेलानो, अने मरता माणसनो ( हृदयमां रहेलो ) सत्य भाव प्रगट थाय छे. ॥ १ ॥

इति निश्चित्य चाणिक्यः । समाहूय कुटुंबिनः ॥ मद्येन मदयित्वा तां-स्तद्भावं ज्ञातुमूचिवान् ॥ २ ॥

एवो निश्चय करीने चाणिक्ये ते कुटुंबीओने बोलावीने, तथा तेओने मदिरापानथी बेभान करीने, तेओना हृदयना अभिप्रायने जाणवा माटे कह्युं के-॥ २ ॥

द्वे वस्त्रे धातुरक्ते मे । त्रिदंडं स्वर्णकुंडिका ॥ वर्तते च वशे राजा । होलां वादयतात्र मे ॥ ३ ॥

रंगथी रंगेलां बे वस्त्रो, त्रिदंडिका तथा स्वर्णनुं कमंडल मारी पासे छे, तेमज राजा मारे स्वाधीन छे, माटे अहीं मारी झालर वगाडो ? ॥ ३ ॥

तच्चाणिक्योक्तमाकर्ण्य । ते सर्वेऽपि कुटुंबिनः ॥ गर्वतः स्वस्वसर्वस्व-मेकैकानुष्टुभाऽभ्यधुः ॥ ४ ॥

एवी रीतनुं चाणिक्यनुं बोलवुं सांभळीने ते सघळा कुटुंबीओ एकएक अनुष्टुभ् श्लोकवडे करीने गर्वथी पोतपोतानी सघळी मिल्कतनुं वर्णन करवा लाग्या. ॥ ४ ॥

सहस्रयोजनं मार्गं । गच्छतो मम दंतिनः ॥ पदे पदे वित्तलक्षं । होलां वादयतात्र मे ॥ ५ ॥

( एक बोल्यो के ) एक हजार जोजन सुधी मार्गे चालता हाथीने पगले पगले एकेक लाख सोनामहोरो मूकुं ( एटलुं द्रव्य ) मारी पासे छे, माटे मारी पण झालर वगाडो ? ॥ ५ ॥

**तिलाढकस्य सूतस्य । सुनिष्पत्तिं गतस्य च ॥ तिले तिले वित्तलक्षं । होलां वादयतात्र मे ॥ ६ ॥**

( बीजो बोल्यो के ) सारी रीते वावेला, तथा भले प्रकारे पाकेला एवा आढक जेटला तलना जेटला दाणा थाय, तेमना एकेका तलना दाणा उपर एकेक लाख सोनामहोरो मूकुं ( एटलुं द्रव्य ) मारी पासे छे, माटे मारी पण अहीं झालर वगाडो ? । ६ ।

**नद्याः प्रावृषि पूरेण । वहंत्याः पालिबंधनं ॥ एकाहमृक्षणैः कुर्वे । होलां वादयतात्र मे ॥ ७ ॥**

( त्रीजो बोल्यो के )–( मारे त्यां उत्पन्न थता ) एक दिवसना माखणवडे करीने वर्षाकाळमां पूर आवेली नदीनी पाल हुं बांधी शकुं तेम छुं माटे अहीं मारी पण झालर वगाडो ? ॥ ७ ॥

**जात्यानां च किशोराणा–मेकाहप्राप्तजन्मनां ॥ छादयाम्यंसकेशैर्व्यां । होलां वादयतात्र मे ॥ ८ ॥**

( चोथो बोल्यो के ) ( मारे घेर ) एक दिवसे जन्मेला उत्तम जातिना घोडीना वछेराओनी केशवाळीना वाळोवडे समस्त आकाशने हुं ढांकी शकुं तेम छुं, माटे मारी पण झालर अहीं वगाडो ? ॥ ८ ॥

**शालिप्रसूतिगर्दभ्यौ । द्वे रत्ने मम तिष्टतः ॥ छिन्नछिन्नरुहे नित्यं । होलां वादयतात्र मे ॥ ९ ॥** 

( पांचमो बोल्यो के ) कमोदने उत्पन्न करनारी वनस्पतिरूप बे रत्नो मारी पासेछे, के जेने छेदवाथी हमेशां ते उग्याज

करे छे, माटे अहीं मारी पण झालर वगाडो ? ॥ ९ ॥

**अप्रवासी वश्यनार्यः । सहस्रद्रविणोऽनृणः ॥ शुक्लवासा सुगंधाढ्यो । होलां वादयतात्र मे ॥ १० ॥**

( छठ्ठो बोल्यो के ) प्रवास नही करनारो, स्त्री जेने वशमां छे एवो एक हजार सोनामहोरवाळो, करज विनानो, सफेद वस्त्रवाळो, तथा ( अत्तर आदिकनी ) सुगंधिवाळो हुं छुं, माटे मारी पण अहीं झालर वगाडो ? ॥ १० ॥

**एवं विज्ञाय तद्भावं । ते चाणिक्येन निर्मदाः ॥ आढ्या द्रव्यममार्ग्यंत । यथौचित्येन धीमता ॥ ११ ॥**

एवी रीते तेओना हृदयनी वात जाणीने ज्यारे तेओ शुद्धिमां आव्या, त्यारे ते बुद्धिमान चाणिक्ये ते धनवानो पासेथी नीचेमुजब यथोचित द्रव्य माग्युं. ॥ ११ ॥

**एकयोजनगामीन-पदमित्यर्थलक्षकाः ॥ तथैकतिलजतिल-मितान् शतसहस्रकान् ॥ १२ ॥**

तेथी ( पहेला धनवाने ) एक जोजनसुधी जनारा हाथीना पगलां जेटली लाख सोनामहोरो, तथा ( बीजाए ) एक तलमांथी निपजता तल जेटली लाख सोनामहोरो आपी. ॥ १२ ॥

**एकाहम्रक्षणाज्यं चै-काहाश्वान् मासि मासि च ॥ कोष्टागारभृतः शालीं-श्चाणिक्याय ददुश्च ते ॥ १३ ॥**

( त्रीजाए ) दर मासे एक दिवसना माखणनुं घी, तथा ( चोथाए ) एक दिवसना जन्मेला घोडाओ, तथा ( पांचमाए ) कोठार भराय एटली कमोद आपी. ॥ १३ ॥

एवं संपूर्य कोशौघान् । कोष्टागाराणि निर्वृतः ॥ चाणिक्यः कृतकर्तव्यो । राज्यं राजेव शास्ति सः ॥ १४ ॥

एवी रीते ( द्रव्यथी ) भंडारो, तथा ( अनाजथी ) कोठारो भरीने निश्चिंत थएलो ते चाणिक्य कृतार्थ थयोथको राजानीपेठे राज्य चलाववा लाग्यो. ॥ १४ ॥

हारेणेव विहारेण । स्फुरन्मुक्तानुषंगिणा ॥ तत्र प्रसाधयंतः क्ष्मा-मेयुर्विजयसूरयः ॥ १५ ॥

एवामां ते पाटलीपुत्र नगरमां देदीप्यमान सिद्धोए आचरेला ( पक्षे-कांतियुक्त मोतीओवाळा ) हारसरखा विहारवडे करीने पृथ्वीने शोभावता एवा श्रीविजयसूरि पधार्या. ॥ १५ ॥

क्षीणजंघाबलास्तेऽथ । वृद्धावासं चिकीर्षवः ॥ ज्ञात्वा च भावि दुर्भिक्षं । शिष्यमात्मपदे व्यधुः ॥ १६ ॥

( विहार करवामाटेनुं ) जंघाबल क्षीण थवाथी वृद्ध एवा ते आचार्ये ( त्यां ) निवास करी रहेवानी इच्छा थवाथी भविष्यकाळमां दुष्काळ पडवानो जाणीने पोतानी पाटे एक शिष्यने स्थाप्या. ॥ १६ ॥

विद्याद्यतिशयांस्तस्य । रहस्याख्यन्निधीनिव ॥ गच्छं समर्प्य प्राहैषुः । सुभिक्षनृति नीवृतौ ॥ १७ ॥

पछी ते शिष्यने तेमणे गुप्त रीते एकांतमां निधानोनीपेठे विद्याआदिकना अतिशयो कह्या, तथा पछी गच्छ सोंपीने तेमने सुकाळवाळा देशमां मोकल्या. ॥ १७ ॥

गुरुस्नेहानुरागेण । कृत्वा तद्दृष्टिवंचनं ॥ क्षुल्लकद्वितयं त्वागा-न्निर्वृत्य गुरुसन्निधौ ॥ १८ ॥

परंतु बे न्हानी उमरना साधुओ गुरुना स्नेहने लेइने ते गच्छाधिपतिनी नजर चूकावीने पाछा वळी गुरुपासे त्यां आव्या. ॥ १८ ॥

गुरुणाभिहितौ वत्सौ । युक्तं नैतदनुष्ठितं ॥ पतिष्यत्यत्र दुष्कालः । करालः कालसोदरः ॥ १९ ॥

त्यारे गुरुमहाराजे तेओने कह्युं के, हे वत्सो ! तमोए आ योग्य कर्युं नही, केमके अहीं कृतांतसरखो भयंकर दुष्काल पडवानो छे. ॥ १९ ॥

ऊचे ताभ्यां न नौ तत्र । प्रतिभाति प्रभून् विना ॥ तदत्रावां सहिष्यावः । सर्वं पूज्यांतिके स्थितौ ॥२०॥

त्यारे तेओए कह्युं के, हे भगवन् ! आपविना अमोने त्यां चेन पडतुं नथी, माटे अमो अहीं आपनीज पासे रहीने सघळुं ( कष्ट ) सहन करीशुं. ॥ २० ॥

एवं वसति तत्रागाद्–दुर्भिक्षं द्वादशाब्दकं ॥ कृतांतस्य कृतोत्साहं । दानधर्मस्य मांद्यकृत् ॥२१॥

एवी रीते त्यां रह्याबाद यमने उत्साह करनारो, तथा दानधर्मनी मंदता करनारो बार वर्षोनो दुष्काळ त्यां पड्यो. ॥ २१ ॥

यत्रान्नमुदरे रत्न–निधायं विनिधीयते ॥ सर्वैः परस्परं लोकै–र्नित्यं कस्याप्यपश्यतः ॥ २२ ॥

ते दुष्काळमां सर्व लोको परस्पर कोइनी पण दृष्टि न पडे एवी रीते, अर्थात् गुप्त रीते अन्नने रत्नतुल्य लेखीने पोताना

उदरमां नाखे छे. ॥ २२ ॥

तदा दुर्भिक्षराजेन । वांछतैकातपत्रतां ॥ रंकराजा न्ययोज्यंत । निजमांडलिका इव ॥ २३ ॥

ते वखते दुष्काळरूपी राजाए पोतानुंज एक राज्य इच्छतांथकां रंक तथा राजाओने (एकसरखा) पोताना खंडीया राजाओसरखा करी मेल्या. ॥ २३ ॥

उत्तिष्टंत्युपविष्टाश्च । न भिक्षाका गृहे गृहे ॥ दुष्कालक्षितिपालस्य । भटपुत्रा इवोत्कटाः ॥ २४ ॥

वळी ते वखते घेरघेर बेठेला भिक्षाहारीओ जाणे दुष्काळरूपी राजाना जुलमगार सुभटो होय नही? तेम त्यांथी उठताज नथी. ॥ २४ ॥

एवंविधे च काले य-द्धभंते गुरवः क्वचित् ॥ भव्यं भैक्ष्यं तयोस्तत्त-द्यछंति प्रतिबंधतः ॥ २५ ॥

आवी रीतना ( भयंकर ) दुष्काळमां गुरुमहाराजने कदाच क्यांकथी जे जे सारी भिक्षा मळे, ते ते ते बन्ने बाळशिष्योने आग्रह करीने तेओ आपी दे छे. ॥ २५ ॥

क्षुल्लकाभ्यां ततोऽचिंति । विभात्येतन्न सुंदरं ॥ यतो गुरुषु सीदत्सु । का गतिर्नौ भविष्यति ॥ २६ ॥

त्यारे ते बन्ने बालसाधुओए विचार्युं के, आ तो ठीक थतुं नथी, केमके गुरुमहाराजना सीदावाथी आपणी शुं गति थशे? २६

कुलं येन सनाथं स । पुमान् यत्नेन रक्ष्यते ॥ तारकाः स्युः किमाधारा–स्तुंबे नाशमुपेयुषि ॥ २७ ॥

जे वडे करीने कुटुंब सनायक छे, ते पुरुषनी प्रयत्नपूर्वक रक्षा करवी जोइए, केमके जो तुंबडुं नाश पामे, तो पछी तरनाराओने आधार शुं होय? ॥ २७ ॥

चलद्दंते गतमदे । जराजर्जरितेऽपि च ॥ सनाथं सर्वथा नूनं । यूथं यूथपतौ सति ॥ २८ ॥

चलायमान दांतवाळो, मदरहित थयेलो, अने घडपणथी निर्बल थयेलो एवो पण यूथपति हाथी जो हयात होय तोज खरेखर हाथीओनुं टोळुं नायकवाळुं कहेवाय. ॥ २८ ॥

तत्पूज्यैर्नव्यसूरीणां । दीयमानस्तदा निशि ॥ श्रुतोऽस्त्यंजनयोगो यः । कुर्वस्तमिह संप्रति ॥ २९ ॥

माटे गुरुमहाराजे ते वखते नवा आचार्यजीने रात्रिए बतावेलो अंजनयोग आपणे सांभळ्यो छे, माटे हवे अहीं आपणे ते ( अदृश्य करावनारा ) अंजननो उपयोग करीये. ॥ २९ ॥

इत्यालोच्य कृतस्ताभ्यां । योगः सिद्धश्च तेन च ॥ भूत्वाऽदृश्यौ गतौ चंद्र–गुप्तेन सह जेमितुं ॥ ३० ॥

एम विचारीने तेओ बन्नेए ते अंजननो प्रयोग कर्यो, अने ते सिद्ध थयो, पछी तेओ बन्ने ते अंजनवडे अदृश्य थइने चंद्रगुप्तनी साथे भोजन करवा लाग्या. ॥ ३० ॥

तमालोक्य च भुंजानं । पार्श्वयोरुपविश्य च ॥ भुक्त्वा यातौ तथैवाथ । भुंजाते तौ दिने दिने ॥ ३१ ॥

त्यां ते चंद्रगुप्त राजाने जमतो जोइने, ते बन्ने क्षुल्लको तेनी साथे बन्ने पडखे बेसी भोजन करीने गया, अने एवी रीते तेओ दररोज भोजन करवा लाग्या. ॥ ३१ ॥

राजान्यदिनमानेन । भुंक्ते भुक्तोद्धृते सति ॥ अजीर्णनयतो वैद्यैः । सपद्युत्थाप्यतेस्म सः ॥ ३२ ॥

अन्य दिवसजेटलुं, अर्थात् हमेशना नियममुजब ( भोजन ) जमाइ गयाबाद तथा तेना जम्याबाद जेटली रसोइ वधवी जोइये तेटलो वधारो रहेथी अजीर्ण थवाना भयथी वैद्यो ते राजाने तुरत जमतो उठाडी लेवा लाग्या. ॥ ३२ ॥

एवं चैकस्य भोज्यार्हे । भुज्यमाने जनैस्त्रिभिः ॥ अतृप्यन् कृशतां याति । राजा वक्ति ह्रिया न च ॥३३॥

एवी रीते एक माणसने जमवाजेटलुं भोजन त्रण माणसो जमता होवाथी, तृप्त नही थतो एवो ते राजा दुबळो पडी गयो, तथा लज्जाने लीधे कोइने ( पोते भूख्या रहेवानी ) ते हकीकत तेणे कही नही. ॥ ३३ ॥

कृष्णपक्षेंदुवच्चंद्र–गुप्तं कार्श्यजुषं ततः ॥ पप्रच्छ चाणिस्पूर्वत्स । दुष्कालः किं तवापि हि ॥ ३४ ॥

पछी कृष्णपक्षना चंद्रनीपेठे दुबळा थयेला चंद्रगुप्तने चाणिक्ये पूछयुं के, हे वत्स! शुं तने पण दुष्काळ नड्यो? ॥ ३४ ॥

स ऊचे नार्य तृप्यामि । चाणिक्योऽचिंतयत्ततः ॥ अव्यक्तः कोऽपि सिद्धोऽस्या–हारं हरति निश्चितं ।३५।

त्यारे चंद्रगुप्त बोल्यो के, हे आर्य! हुं धरातो नथी, त्यारे चाणिक्ये विचार्यु के, खरेखर कोइक सिद्ध पुरुष गुप्त रीते आ चंद्रगुप्तना भोजननुं हरण करे छे. ॥ ३५ ॥

द्वितीयेऽह्न्यैष्टिकश्चूर्णः । कीर्णो भोजनमंडपे ॥ द्वयोर्बालकयोस्तत्र । पदपंक्तिस्ततोऽभवत् ॥३६॥

( एम विचारि चाणिक्ये ) बीजे दिवसे ते भोजनशाळामां इंटोनो बारिक भूको पथराव्यो, तेथी तेपर बे बाळकोना पगलांओनी पंक्ति पडी गइ. ॥ ३६ ॥

निश्चिकाय तया मंत्री । नूनं सिद्धांजनाविमौ ॥ द्वारं बध्ध्वा ततस्तत्र । सद्यो धूममकारयत् ॥३७॥

त्यारे चाणिक्यमंत्रीए निश्चय कर्यो के, खरेखर आ बन्ने बाळको सिद्धांजनवाळा छे. पछी त्यां तेणे दरवाजो बंध करीने तुरत धूमाडो कराव्यो. ॥ ३७ ॥

धूमेन गलतोरक्ष्णो- रश्रुभिः क्षालितेंजने ॥ दृष्टौ नृपस्य पार्श्वस्थौ । भुंजानौ क्षुल्लकावुभौ ॥ ३८ ॥

पछी ते धूमाडाने लीधे ( तेओनी ) आंखो अश्रुना जलवडे भींजाइ जवाथी ( आंजेलुं ) अंजन धोवाइ गयुं, अने तेथी राजानी पासे बेसीने जमता एवा ते बन्ने बालसाधुओ दृष्टिए पड्या. ॥ ३८ ॥

श्रान्यां विटालितोऽस्मीति । राजाभूद्दुर्मना मनाक् ॥ माभूच्छासनहीलेति । तमेवं स्माह धीसख ॥३९॥

अरे! आ साधुओए तो मने वटलाव्यो, एम विचारतो राजा मनमां जरा दुभावा लाग्यो, त्यारे शासननी हीलना न थाओ, एम विचारि चाणिक्ये राजाने कह्युं के, ॥ ३९ ॥

कालुष्यं वत्स किं धत्से । शुद्धिरद्यैव तेऽभवत् ॥ यद्बालयतिभिः सार्धं । भुक्तोऽस्येकत्र भाजने ॥ ४० ॥

हे वत्स! तुं शामाटे दुभाय छे? आजेज तारी तो शुद्धि थइ गइ, केमके आ बालमुनिओ साथे एकज वासणमां तने भोजन करवानुं मळ्युं. ॥ ४० ॥

कः साधुभिः समं भोक्तु–मेकत्र लभते गृही ॥ ततस्त्वमेव पुण्यात्मा। सुलब्धं जीवितं च ते ॥ ४१ ॥

वळी साधुओ साथे बेशीने एक भाजनमां जमवानुं कया गृहस्थने मळे? माटे खरेखर तुंज पवित्र आत्मावाळो छे, अने तारोज जन्म सफल थयो छे. ॥ ४१ ॥

न द्रष्टुमपि लभ्यंते । भुंजाना ये महर्षयः ॥ तैः समं भोजनादद्य । श्लाघनीयोऽसि कस्य न ।४२।

जे महामुनिओने भोजन करता कोइ नजरे पण जोइ शकता नथी, एवा ते मुनिओसाथे आजे भोजन करवाथी तुं कोने प्रशंसा करवा लायक नथी? ॥ ४२ ॥

एते च त्रिजगद्वंद्याः । कुमारब्रह्मचारिणः । एतत्पादरजोऽपीह । पावनेभ्योऽपि पावनं ॥ ४३ ॥

आ बालब्रह्मचारी मुनिओ तो त्रणे जगत्ने नमवा योग्य छे, एमना चरणोनी रज पण पवित्रमां पण पवित्र छे. ॥ ४३ ॥

चंद्रगुप्तं प्रबोध्यैवं । क्षुल्लकौ तौ विमृश्य च ॥ चाणिक्योऽप्यनु तत्रागा–दुपालंभं ददौ गुरोः ।४४।

एवी रीते चंद्रगुप्तने समजावीने, तथा तेओ बन्नेने बालमुनिओ जाणीने चाणिक्य तेओनी पाछल त्यां उपाश्रयमां आव्यो तथा तेमाटे गुरुमहाराजने ठपको देवा लाग्यो के, ॥ ४४ ॥

**प्रभो नवद्विनेयाव-प्येवं यत्कुरुतस्ततः ॥ अन्यत्र कुत्र चारित्रं । पवित्रं प्राप्स्यतेऽधुना ॥ ४५ ॥**

हे भगवन्! आपना शिष्यो पण ज्यारे आम करे छे, त्यारे हवे बीजे क्यां पवित्र चारित्र मळशे?! ॥ ४५ ॥

**गुरुणा भणितः सोऽथ । चाणिक्य श्रावको भवान् ॥ मोदिष्यते त्वया स्वस्थः। स श्रावकचणश्चणी ४६**

त्यारे गुरुए तेने कह्युं के, हे चाणिक्य! तुं पोते श्रावक छो, अने तेथी श्रावकोमां उत्तम अने शांत एवो जे (तारो पिता) चणी, तेनी तुं अनुमोदना करीश. ॥ ४६ ॥

**प्राप्तोत्कर्षेऽत्र दुष्काले । प्राप्तोत्कर्षे च वैभवे ॥ तवेदृग्दानमहादाना-द्भवांभोधिर्न दुस्तरः ॥ ४७ ॥**

हवे अहीं जेम महादुष्काल वृद्धि पामेलो छे, तेम अहीं तारी समृद्धि पण वृद्धि पामेली छे, माटे हवे तारा आवी रीतना महादानथी (साधुओने) आ संसारसागर तरवो मुश्केल नही थाय!! ॥ ४७ ॥

**अत एवाखिलो गच्छो । प्रैषि देशांतरं मया ॥ त्वादृशं श्रावकमिह । मत्वा कल्पद्रुमायितं ॥४८॥**

अने तेथीज ताराजेवा कल्पवृक्षसरखा! श्रावकने अहीं रहेला जाणीने समस्त साधुसमुदायने में बीजा देशमां मोकली आप्यो छे! ॥ ४८ ॥

क्षुल्लकद्वयमप्येत–द्यदेवं वर्तते मम ॥ श्रावकस्य प्रसिद्धिस्ते। भविष्यति महीयसी ॥ ४९ ॥

हवे ( अहीं रहेला ) फक्त मारा आ बे बालसाधुओने ज्यारे आवी रीते निर्वाह करवो पडे छे, त्यारे श्रावक एवो जे तुं तेनी घणी कीर्ति फेलाशे!!! ॥ ४९ ॥

शिष्यावपि गुरुः स्माह। युवाभ्यां किमहो कृतं ॥ त्याज्यो हि साधुभिर्नात्मा। महत्यपि परीषहे ।५०।

पछी गुरुमहाराजे पोताना ते बन्ने बालशिष्योने कह्युं के, अहो! तमोए पण आ शुं कर्युं? केमके महान् परीषह वखते पण साधुओए पोताना आत्माने छुटो मेलवो जोइए नही, ( अर्थात् आत्माने वश राखवो जोइये. ) ॥ ५० ॥

करिणः करिसंघट्टे। निष्कस्य कषपट्टके ॥ व्यसने सात्विकानां च। सारत्वं ज्ञायते खलु ॥५१॥

हाथी साथे लडती वखते हाथीनी, कसोटीपर सोनामोहोरनी, तथा दुःखवेळाए सात्विकोनी खरी परीक्षा थाय छे. ।५१।

क्षमयामासतुः शिष्यौ। ततः स्वागः प्रणम्य तौ ॥ करिष्यावः पुनर्नैवं। प्रभो मिथ्यास्तु दुष्कृतं ।५२।

पछी ते बन्ने शिष्योए नमीने पोतानो ते अपराध खमाव्यो, अने कह्युं के, हे भगवन्! फरीने अमो तेम नही करीयें, अमारुं आ दुष्कृत मिथ्या थाओ? ॥ ५२ ॥

चाणिक्योऽप्येतदाकर्ण्य। लज्जितो गुरुमूचिवान् ॥ प्रभोऽनुशास्तिनावाहं। भवांभोधेस्त्वयोध्धृतः ।५३।

ते सांमळीने चाणिक्य पण लज्जित थयोथको गुरुमहाराजने कहेवा लाग्यो के, हे भगवन्! आपे आजे मने आ शिखामण-रूपी होडीथी संसारसमुद्रमां डुबतो बचाव्यो छे. ॥ ५३ ॥

इतः प्रभृति मद्गेहे । विशुद्धैरशनादिभिः ॥ अनुग्रहः सदा कार्यो । निस्तार्योऽहं प्रमद्धरः ॥५४॥

( माटे हे भगवन्! ) हवेथी हमेशां मारे घेरथी शुद्ध आहारआदिक लेवावडे करीने मारापर कृपा करवी, अने ए रीते प्रमादने धारण करनारा एवा मने आपे ( आ संसारसागरथी ) तारवो. ॥ ५४ ॥

इयंत्यहानि भक्ताद्यै-रुपष्टंभः कृतो न यत् ॥ तन्मे प्रसह्य शिष्याणोः । क्षमणीयं क्षमाधनैः ॥५५॥

( वळी हे भगवन्) आटला दिवसोसुधी आहारआदिकवडे आपसाहेबनुं माराथी जे वैयावृत्य नथी थयुं, ते माटे आपनो आ लघुशिष्यसरखो जे हुं ते पर कृपा करीने आप क्षमाश्रमणे क्षमा करवी. ॥ ५५ ॥

इत्युक्त्वा गुरुमानम्य । चाणिक्यो जग्मिवान् गृहं ॥ क्षुल्लकावपि तद्गेहे-ऽन्नाद्यं जगृहतुः स्वयं ॥५६॥

एम कही गुरुने नमीने चाणिक्य पोताने घेर गयो, तथा ते बन्ने बालसाधुओ पण पोतानी मेळे तेने घेरथी आहारआ-दिक लाववा लाग्या. ॥ ५६ ॥

ज्ञात्वान्येद्युश्चंद्रगुप्तं । मिथ्यादृष्टिप्रतारितं ॥ तत्पितेव प्रियाकर्तु-मन्वशात्तं चणिप्रसूः ॥ ५७ ॥

हवे एक वखते चंद्रगुप्तने मिथ्यात्वीओए भोळवेलो जाणीने चाणिक्ये तेना पितानी पेठे तेने शिखामण आपी के, ।५७।

**अमी पाखंडिनो वत्स। जीविकार्थं धृतव्रताः॥ दुःशीला निःकृपाः पापा। नामाप्येषां न गृह्यते ॥५८॥**

हे वत्स! ते लोको पाखंडी छे, अने फक्त आजीविकामाटे तेओए व्रत धारण कर्युं छे, तेमज तेओ दुराचारी, निर्दय तथा पापिष्ट छे, माटे तेओनुं नाम पण लेवुं नही. ॥ ५८ ॥

**छायाप्येषां परित्याज्या। बिभीतकतरोरिव ॥ एतत्पूजादिवार्ता तु। श्रुत्योस्तप्तत्रपूयते ॥ ५९ ॥**

किंपाकवृक्षनी छायानी पेठे ते मिथ्यात्वीओना पडछायानो पण त्याग करवो, अने तेओना सत्कारआदिकनी वात तो कर्णमां तपावेला सीसासरखी जाणवी. ॥ ५९ ॥

**कषायविषयाराति-राजधानीषु धर्मिषु ॥ भस्मनीव हुतं वत्स। दानमेतेषु जायते ॥ ६० ॥**

वळी हे वत्स कषाय अने विषयरूपी शत्रुओनी राजधानी सरखा एवा आ पाखंडी धर्मिओने आपेलुं दान पण राखमां नाखेला घृतनीपेठे निष्फल जाय छे. ॥ ६० ॥

**एते स्वं च स्वभक्तांश्च। मूर्खनिर्यामका इव ॥ पातयंति भवांभोधौ। तदेतांस्त्यज पापवत् ॥६१॥** ॥ ६१ ॥

आ मिथ्यात्वीओ मूर्ख खलासीओनी पेठे पोताने अने पोताना भक्तोने पण आ संसारसमुद्रमां पाडे छे, माटे पापनीपेठे तेओने त्यजी दे? ॥ ६१ ॥

तत् श्रुत्वा स्माह मौर्योऽपि। त्वद्गीर्मे मस्तकोपरि ॥ परमीदृक्क्रियैषां व-स्तातादृष्टाथवा श्रुता ६२

ते सांभळीने चंद्रगुप्ते कह्युं के, हे तात! आपनुं वचन हुं मस्तके चडावुं छुं, परंतु तेओनुं आवुं आचारण आपे प्रत्यक्ष जोयुं छे? के सांभळेलुं छे? ॥ ६२ ॥

चाणिक्यः स्माह दुर्वृत्त-मेषां मे सर्वथा स्फुटं ॥ त्वामपि ज्ञापयिष्यामि। प्रत्यक्षीकृत्य तत्तथा ॥६३॥

त्यारे चाणिक्ये कह्युं के, तेओनुं दुराचरण हुं तो सर्व रीते प्रगट जाणुं छुं, अने ते तने पण प्रत्यक्ष करीने देखाडी आपीश.।६३।

आजूहवदथान्येद्यु-र्मंत्री पाखंडिनोऽखिलान् ॥ आत्मीयात्मीयधर्मस्य। कथनाय नृपाग्रतः ॥६४॥

हवे एक दिवसे ते चाणिक्य मंत्रीए राजा पासे पोतपोतानो धर्म कहेवा माटे सघळा पाखंडिओने बोलाव्या. ॥ ६४ ॥

विजनेंतःपुरासन्ने। स्थानेऽध्यासयतिस्म तान् ॥ तत्र चाक्षेपयल्लोष्ट-चूर्णं प्राक् सुसमं सुधीः ॥६५॥

पछी ते सर्व पाखंडीओने राजाना अंतःपुरनी पासे एकांत स्थानमां बेसाड्या. त्यां ते बुद्धिवान चाणिक्ये प्रथमथीज सर्व जगोए सरखो आछो आछो चूनानो बारिक भूको पथरावी राख्यो हतो. ॥ ६५ ॥

यावद्राजागमं ते च। सर्वेऽप्यविजितेंद्रियाः ॥ उत्थाय जालिकाद्वारै-रैक्षंत नृपवल्लभाः ॥ ६६ ॥

पछी ज्यांसुधीमां राजा त्यां आव्यो, त्यां सुधी ते सघळा लंपट पाखंडीओए उठीने जाळीना बांकाओमांथी चंद्रगुप्त राजानी स्त्रीओने जोया कर्युं. ॥ ६६ ॥

दृष्ट्वा च नृपमायांतं । धृत्वा मुद्रामुपाविशन् ॥ स्वं स्वं धर्ममथाख्याय । राज्ञो जग्मुर्यथागतं ॥ ६७ ॥

पछी राजाने आवतो जोइने तेओ सघळा ( बकसरखी ) मुद्रा धारण करीने ( गुपचुप ) तुरत बेशी गया, तथा पछी राजाने पोतपोतानो धर्म कहीने जेवा आव्या हता, तेवा चाल्या गया. ॥ ६७ ॥

चाणिक्योऽथ नरेंद्रस्य । लोष्टचूर्णोपरि प्रधीः ॥ तत्पदप्रतिबिंबानि । तत्र तत्र प्रदर्शयन् ॥ ६८ ॥
उवाच पश्य स्त्रीलोला । एते यावत्त्वदागमं ॥ अंतःपुरं तवैक्षंत । स्थित्वा स्थित्वोपजालिकां ।६९। युग्मं

पछी ते महाबुद्धिवान चाणिक्य राजाने ते चूनाना भूकापर त्यां त्यां पडेलां तेओना पगलांओनां प्रतिबिंबोने देखाडतो थको कहेवा लाग्यो के, हे वत्स! हवे जो ! ज्यां सुधीमां तुं अहीं आव्यो, त्यां सुधीना वखतमां ते स्त्रीलंपट पाखंडीओए जाळी पासे जइजइने तारां अंतःपुरने जोयुं छे. ॥ ६८ ॥–॥ ६९ ॥

चंद्रगुप्तोऽपि तद् दृष्ट्वा । तेषां दौःशील्यचेष्टितं ॥ विरक्तिमगमत्सद्यः । सव्यलीकांगनास्विव ॥७०॥

एवी रीतना ते पाखंडीओनां लंपटपणानां ते दुराचरणने जोइने चंद्रगुप्त पण कपटी स्त्रीओप्रते जेम, तेम तुरत तेओप्रते विरक्त थयो. ॥ ७० ॥

लोष्टचूर्णं समीकृत्य । तत्तत्रैव सितांबरान् ॥ अध्यासयद् द्वितीयेऽह्नि । तथैवाहूय धीसखः ॥७१॥

पछी बीजे दिवसे ते चाणिक्य मंत्रीए ते चूनानो भूको सरखो करावीने तेज जगोए जैनोना श्वेतांबर मुनिओने तेवीज रीते बोलावीने बेसाड्या. ॥ ७१ ॥

**ध्यानमौनपरास्तेऽपि । मुनींद्राः स्वीयमुद्रया ॥ जितेंद्रियतया तस्थुः । स्थानस्था एव बिंबवत् ।७२।**

त्यारे ते मुनिवरो पण पोतानी मुनिमुद्रापूर्वक धर्म ध्यान तथा मौनपणुं धारण करीने जितेंद्रियपणाथी मूर्तिनीपेठे पोताने स्थानकेज बेशी रह्या. ॥ ७२ ॥

**आगतस्य च भूभर्तु-र्धर्ममाख्याय तेऽप्ययुः ॥ ईर्यासमितिसंलीनाः । साम्यवासितचेतसः ॥ ७३ ॥**

त्यारबाद त्यां आवेला ते चंद्रगुप्त राजाने धर्म संभळावीने ते जैनमुनिओ पण ईर्यासमितिमां लीन थया थका ( कोइ पण जीवनी विराधना न थाय एवी रीते मार्गमां चालता थका ) हृदयमां समाताभाव धारण करीने पोताने स्थानके गया. ।७३।

**चाणिक्योऽथाब्रवीच्चंद्र-गुप्तं पश्य महीपते ॥ पदान्येषां मुनींद्राणां । दृश्यंते नात्र कुत्रचित् ॥ ७४ ॥**

पछी चाणिक्ये चंद्रगुप्तने कह्युं के, हे राजन्! जो? अहीं ते मुनिओना पगलां क्यांय पण देखातां नथी. ॥ ७४ ॥

**नामी प्रैक्षंत ते स्त्रैण-मत्रागत्य जितेंद्रियाः ॥ स्त्रैणे हि तृणधीरेषां । सिद्धिश्रीसंगमार्थिनां ॥७५॥**

ते जितेंद्रिय मुनिओए अहीं आवीने तारी स्त्रीओने जोइ नथी, केमके मोक्षरूपी लक्ष्मीना संगमना अर्थी एवा ते मुनिओ स्त्रीओने तो तृणसमान गणे छे. ॥ ७५ ॥

सुसाधुषु दृढभक्ति-श्चंद्रगुप्तस्ततः परं ॥ दृष्टशुद्धसमाचारः, संजज्ञे परमार्हतः ॥ ७६ ॥

हवे त्यारथी मांडीने ते मुनिओनुं निर्मल आचरण जोवाथी ते चंद्रगुप्त राजा परम जैनी थइने तेवा उत्तम साधुओप्रते दृढ भक्तिवाळो थयो. ॥ ७६ ॥

चाणिक्योऽन्येद्युराद्ध्यौ । कश्चित्तौ क्षुल्लकाविव ॥ यद्यदृश्यो विषं राज्ञे । दद्यात्तस्यान्न शोभनं ७७

हवे एक वखते चाणिक्ये विचार्युं के ते बे बाल साधुओनीपेठे कदाच कोइ अदृश्य थइने जो राजाने झेर आपी दे, तो सारुं थाय नही. ॥ ७७ ॥

विमृश्येति स राजानं । विषमिश्रितमोदनं ॥ सहमानं सहमानं । भोजयामास नित्यशः ॥ ७८ ॥

एम विचारीने ते चाणिक्य हमेशां जेम जेम राजाने सहेवातुं थाय, तेम तेम ( थोडुं थोडुं ) विषथी मिश्रित थयेला भातनुं भोजन आपवा लाग्यो. ॥ ७८ ॥

राज्ञश्चास्ति महादेवी । धारिणी गर्भधारिणी ॥ तस्याः समं नृपेणैक-स्थानेऽभूद्भुक्तिदोहदः ॥७९॥

हवे ते चंद्रगुप्त राजानी धारिणी नामनी पट्टराणी गर्भवती थइ, त्यारे तेणीने राजानी साथे बेशीने जमवानो दोहलो थयो. ।७९।

सा चाभूत्तदसंपत्तौ । शशिलेखेव दुर्बला ॥ विलोक्य तादृशीं तां च । पृच्छतिस्म महीपतिः ॥८०॥

ते दोहलो पूर्ण न थवाथी ते चंद्रनी कलानी पेठे दुर्बल थवा लागी, त्यारे तेणीने तेवी दुर्बल थती जोइने राजाए पूछयुं के, ॥ ८० ॥

**किं ते न पूर्यते किंचि-दाज्ञां वा कोऽप्यखंडयत् ॥ किं केनाप्यभिभूता वा। यदेवं देवि दुर्बला ८१**

हे प्रिये! शुं तारी कोइ होंस पूरी थइ नथी? अथवा कोइये पण तारी आज्ञा खंडित करी छे? अथवा कोइये तारो पराभव कर्यो? के जेथी तुं आम दुर्बल थती जाय छे. ॥ ८१ ॥

**सावदन्नैकमप्येषां । हेतुः कार्श्याय किं पुनः ॥ त्वया सहैकस्थाले मे । भोक्तुं देवास्ति दोहदः ८२**

त्यारे तेणीए कह्युं के, हे स्वामी! मारां दुर्बलपणानुं कारण आपे कहेलां कारणोमांथी एक पण नथी, परंतु तमारी साथे एक थालीमां भोजन करवानो मने दोहलो उत्पन्न थयो छे. ॥ ८२ ॥

**राज्ञोचे देवि विश्वस्ता । भव श्वः पूरयिष्यते ॥ सह भोक्तुं द्वितीयेऽह्नि । तामथाजूहवन्नृपः ।८३।**

त्यारे राजाए कह्युं के, हे प्रिया! तुं स्वस्थ था? आवती काले तारो ते दोहलो संपूर्ण करीश, पछी बीजे दिवसे राजाए साथे जमवा माटे तेणीने बोलावी. ॥ ८३ ॥

**चाणिक्यः स्माह मादास्त्वं । वत्स राज्याः स्वभोजनं ॥ यतस्तवायमाहारः । सर्वोऽपि विषभावितः ।८४।**

त्यारे चाणिक्ये चंद्रगुप्तने कह्युं के, हे वत्स! तुं राणीने तारुं भोजन न आपजे? केमके तारुं आ सर्व भोजन विषमिश्रित छे. ८४

ततो दिने दिनेऽप्यस्या । मार्गयंत्या नृपोऽन्यदा ॥ अनागच्छति चाणिक्ये । ददौ कवलमेककं ।८५।

पछी हमेश हमेश तेणीए भोजन मागवाथी एक दिवसे राजाए चाणिक्यना आववा पहेलांज तेणीने पोताना भोजनमांथी एक कोळीओ आप्यो. ॥ ८५ ॥

तं यावदत्ति सा देवी । चाणिक्यस्तावदागतः ॥ दृष्ट्वा च स्वादयंतीं ता–मा: किं चक्रे स्ववैरिणि ।८६।

सर्वनाशे समुत्पन्ने–ऽप्यर्धं त्यजति पंडितः ॥ द्वयोः प्राप्ते विषान्मृत्यौ । जीवयाम्यहमेककं ॥ ८७ ॥

जल्पन्नित्युदरं तस्या । विदार्य क्षुरिकाकरः ॥ रोहणोर्व्या रत्नमिव । पुत्ररत्नं तदाकृषत् ॥ ८८ ॥

॥ त्रिभिर्विशेषकं ॥

पछी जेवामां ते राणी ते खाय छे, तेवामां चाणिक्य त्यां आवी पहोंच्यो, अने तेणीने खाती जोइने बोल्यो के, अरे! पोतानाज आत्मानी वैरिणि! आ तें शुं कर्युं? पछी ज्यारे सर्वनो नाश थतो होय, त्यारे बुद्धिवाने अर्धुं जतुं करवुं जोइए, हवे आ समये झेरथी बन्नेनुं मृत्य थवानुं छे, तो ते बेमांथी एकने तो जीवाडुं, एम बोलता ते चाणिक्ये हाथमां छरी लेइने ते राणीनुं उदर चीरी नाख्युं, अने रोहणाचलनी भूमिमांथी जेम रत्नने, तेम तेणीना उदरमांथी पुत्ररत्नने खेंची लीधो. ८६-८७-८८

क्षिप्त्वा घृतादिमध्ये तं । दिनान्यूनान्यपूरयत् ॥ तज्जनन्याश्च धारिण्या । मृतकार्यमकारयत् ॥ ८९ ॥

पछी चाणिक्ये ते पुत्रने घृतआदिकनी अंदर राखीने तेना ओछा दिवसो पूरा कर्या, अने तेनी माता धारिणीनुं अवसानकार्य कराव्युं. ॥ ८९ ॥

**तमश्नंत्याश्च मातुस्त–द्विंदुर्मूर्ध्न्यपतच्छिशोः ॥ नोदगुस्तत्प्रदेशेऽथ । केशाः शस्यमिवोषरे ॥ ९० ॥**

हवे तेनी माता ज्यारे ते विषमिश्रित भोजन खाती हती, त्यारे तेनुं एक बिंदु ते बाळकना मस्तकपर पड्युं हतुं, तेथी उपरभूमिमां जेम धान्य न उगे, तेम ते बाळकना मस्तकना ते भागपर केशो उग्या नही. ॥ ९० ॥

**अत एवाभिधां तस्य । बिंदुसार इति व्यधुः ॥ वर्धमानोऽथ सोऽधीयन् । शशीवाभूत्कलामयः ९१**

अने तेथीज तेनुं बिंदुसार नाम पाड्युं, पछी ते वृद्धि पामतो थको तथा अभ्यास करतो थको चंद्रनीपेठे कळावान थयो. ९१

**अन्यदोपरते राज्ञि । बिंदुसारोऽभवन्नृपः ॥ ववृधेऽथ प्रतापेन । निदाघार्क इवान्वहं ॥ ९२ ॥**

त्यारबाद एक वखते ते चंद्रगुप्त राजाना मृत्युबाद बिंदुसार राजा थयो, तथा उष्णकाळना सूर्यनी पेठे ते प्रतापवडे हमेशां वृद्धि पामवा लाग्यो. ॥ ९२ ॥

**शिष्यमाणः मुहुः सोऽपि । धात्र्या मात्रेव नित्यशः ॥ आराधयति चाणिक्यं । चंद्रगुप्त इवापरः ।९३।**

तेनी धावमाताए वारंवार शिखामण आपवाथी ते बिंदुसार पण बीजा चंद्रगुप्तनी पेठे हमेशां चाणिक्यने सेवतो हतो.।९३।

**सुबंधुनान्यदैकांते । राजोचे नंदमंत्रिणा ॥ अस्थापितोऽपि मंत्रित्वे । देव किंचित्करोम्यहं ॥९४॥**

हवे एक वखते नंदराजाना मंत्री सुबंधुए ते बिंदुसार राजाने एकांतमां कह्युं के, हे स्वामी! जो के मने आपे मंत्रिपदे स्थाप्यो नथी, तोपण तमारुं कंइंक हित करवाने हुं इच्छुं छुं. ॥ ९४ ॥

**यद्यप्यस्मद्गिरः स्वामि–न्नार्थत्यत्र तथापि हि ॥ पट्टस्यास्य हितं वक्तुं । जिह्वा कंडूयते मम ॥९५॥**

वळी हे स्वामी! जो के मारुं कहेवुं तो निरुपयोगी छे, तोपण आ राजगादीनुं हित कहेवा माटे मारी जिह्वा तलपी रही छे. ॥ ९५ ॥

**य एष देव चाणिक्यो । मंत्रीशोऽस्त्यतिदारुणः ॥ विदार्योदरमेतेन । त्वन्मातात्यमार्यत ॥ ९६ ॥**

हे स्वामी ! जे आ चाणिक्य मंत्रीश्वर छे, ते महा घातकी छे, तेणे पेट चीरीने आपनी माताने पण मारी नाखी छे. । ९६।

**ततः स्वात्मापि यत्नेन । रक्षणीयस्त्वया नृप ॥ सोऽथ पप्रच्छ तद्धात्रीं । साप्यवादीदनूदिति ॥९७॥**

माटे हे राजन् ! आपे आपना आत्मानुं यत्नपूर्वक रक्षण करवुं. पछी राजाए ते हकीकत पोतानी धावमाताने पूछी, त्यारे तेणीए पण कह्युं के एम थयुं छे. ॥ ९७ ॥

**ततः क्रुद्धः स चाणिक्ये–ऽभ्यायात्यासीत्पराङ्मुखः ॥ खलप्रवेशं विज्ञाय । चाणिक्योऽपि गृहं गतः ९८**

तेथी क्रोधायमान थयेलो बिंदुसार राजा ज्यारे चाणिक्य तेनी पासे आव्यो, त्यारे पोतानुं मुख फेरवी गयो, ते जोइ चाणिक्ये जाण्युं के राजा पासे कोइ दुर्जननो प्रवेश थयो छे, एम विचारि ते पोताने घेर गयो. ॥ ९८ ॥

अलं प्रत्यायय पृथुकं । किमारंभेण मेऽधुना ॥ अवश्यमेव मर्तव्ये । म्रियते किमशंबलैः ॥ ९९ ॥

( घेर जइ चाणिक्ये विचार्युं के ) हवे आ बालराजानें ( मारी ) खातरी कराववाथी सर्युं, केमके हवे मारे आरंभ करवानी शी जरुर छे? वळी मरवुं तो अवश्य छे, तो पछी ( पुण्यकार्यरूप ) भातुं लीधाविना शामाटे मारे मरवुं जोइये? ।९९।

इति ध्यात्वा परित्यज्य । राज्याकांक्षां निजं धनं ॥ चाणिक्येनोप्यताशेषं । सप्तक्षेत्र्यां सुबीजवत् । ३०० ।

एम विचारी चाणिक्ये राज्यनी इच्छा छोडीने पोतानुं सघलुं धन साते क्षेत्रोमां उत्तम बीजनी पेठे वाव्युं. ॥ ३०० ॥

अथेष्टस्वजनादीना—मौचित्येनोपकृत्य च ॥ अनाथदीनदुःस्थानां । दानं दत्वानुकंपया ॥ १ ॥

विचार्य वर्यया बुद्ध्या । प्रतीकारक्रमं रिपोः ॥ पत्रकं गंधचूर्णं च । मध्यान्मध्ये निधाय च ॥ २ ॥

गत्वा बहिः करीषांतः । सुस्थानस्थंडिले गवां ॥ विधायानशनं तस्था—विंगिनीमरणेच्छया ॥ ३ ॥

॥ त्रिभिर्विशेषकं ॥

पछी मित्र तथा संबंधिआदिकोपर योग्यतामुजब उपकार करीने, तथा निराश्रित, दीन अने दरिद्रीओने दयाथी दान देइने, तेमज उत्तम बुद्धिथी शत्रुने पण बदलो आपवानुं विचारिने तेमाटे पत्रसहित सुगंधि चूर्णने ( डाबडाआदिकमां ) घणीज चोकसाइथी गोठवीने, तथा शेहेर बहार उत्तम निरवद्य स्थानमां जइ, गायोनां सूकेलां छाणाओना ढगलामां इंगिनीमरणनी इच्छाथी चाणिक्य अनशन करीने रह्यो. ॥ १ ॥ २ ॥ ३ ॥

तच्चाकर्ण्य नृपो धात्र्या-ऽभ्यधायि ननु वत्स किं ॥ अवज्ञातो महामात्यः। प्राणदो राज्यदश्च ते ॥ ४ ॥

आ हकीकत सांभळीने ते धावमाताए राजाने कह्युं के, हे वत्स ! तने जीवितदान, तथा राज्य आपनारा एवा ते महामंत्री चाणिक्यनुं तें अपमान शामाटे कर्युं ? ॥ ४ ॥

तत्सर्वं तन्मुखात् श्रुत्वा । स्वरूपं भूपतिस्तदा ॥ तत्र गत्वा पदोर्लग्न-श्चाणिक्यं स्माह भक्तिमान् ।५।

पछी तेणीना मुखथी ते सर्व वृत्तांत सांभळीने बिंदुसार राजा तेज वखते त्यां जइ चाणिक्यने पगे पड्यो, अने भक्तिवंत थइ कहेवा लाग्यो के, ॥ ५ ॥

अज्ञानेनास्यवज्ञात-स्तात मा मां ततस्त्यज ॥ पुरीषमुत्सृजत्यंके । डिंभश्चेत्त्यज्यते स किं ॥६॥

हे पिताजी ! में अज्ञानपणाने लीधे आपनी अवज्ञा करी छे, माटे हवे तमो मारो त्याग न करो? केमके बाळक कदाच खोळामां विष्टा करे, पण शुं तेने तजी देवाय छे? ॥ ६ ॥

तत्प्रसीद गृहानेहि । शाधि साम्राज्यमात्मनः ॥ स ऊचे वत्स पर्याप्तं । यत्संप्रत्यनशन्यहं ॥ ७ ॥

माटे मारापर कृपा करी घेर चालो? अने तमारुं पोतानुं राज्य चलावो? त्यारे चाणिक्ये कह्युं के, हे वत्स! हवे मारे कंइ इच्छा नथी, केमके हवे में अनशन लीधुं छे. ॥ ७ ॥

ततो राजा वलित्वागा-न्नतसर्वस्ववद्रुदन् ॥ हाभूवमकृतज्ञोऽह-मिति स्वं हीलयन्मुहुः ॥ ८ ॥

पछी ते बिंदुसार राजा, अरे! हुं कृतघ्न थयो! एम वारंवार पोताने निंदतोथको, तथा पोतानुं जाणे सर्व कंइं विनाश पाम्युं होय तेनी पेठे रडतोथको त्यांथी पाछो वळी पोताने स्थानके गयो. ॥ ८ ॥

दध्यौ सुबंधुर्यद्येष । कथंचन निवर्तते ॥ समूलकाषं मद्वर्गं । कषत्येव ध्रुवं ततः ॥ ९ ॥

हवे सुबंधु विचारवा लाग्यो के, जो कदाच ते चाणिक्य कोइ रीते पाछो आवशे, तो खरेखर मारां स्वजन कुटुंबसहित मारुं जडमूळ कहाडी नाखशे. ॥ ९ ॥

विचिंत्येति शठः साश्रु-र्नृपमूचे सगद्गदः ॥ देवाविमृश्यकृत्त्वेना-नर्थोऽभूदेष दैवतः ॥ १० ॥

एम विचारीने ते दुष्ट आंखोमां आंसु लावी गद्गदकंठे राजाने विनववा लाग्यो के, हे स्वामी ? में वगरविचार्युं करवाथी दैवयोगे आ अनर्थ निपज्यो छे. ॥ १० ॥

देवाज्ञया तदेतर्हि । साम्यनिर्मग्नचेतसः ॥ चाणिक्यस्य सपर्याद्यै-र्भाववृद्धिं करोम्यहं ॥ ११ ॥

माटे हवे जो आप आज्ञा आपो तो समतायुक्त चित्तवाळा ते चाणिक्यनी भक्तिआदिकथी हुं मारा (शुभ) भावनी वृद्धि करुं. ॥ ११ ॥

ततो राज्यनुमत्या स। संध्यायामेत्य दाम्भिकः ॥ कृत्वार्चां न्यस्य चोपांते। धूपांगारं गतः कुधीः। १२।

पछी राजानी अनुमतिथी ते दुर्बुद्धि कपटी सुबंधु संध्याकाळे चाणिक्यपासे आवी तेनी पूजा करीने त्यां धूपना सळगता अंगारा मूकीने चाल्यो गयो. ॥ १२ ॥

चाणिक्योऽप्यग्निना तेन। तप्यमानो महामनाः ॥ भावनां भावयामास। दुःकर्मग्रसनोरगीं ॥ १३ ॥

पछी ते अग्निथी तपवा ( दाझवा ) छतां पण उदार मनवाळो चाणिक्य दुष्कर्मोने गळी जवामां अजगरीसरखी ( नीचे-मुजब ) शुभ भावना भाववा लाग्यो. ॥ १३ ॥

अमेध्यमूत्रप्रस्वेद-मलदौर्गंध्यपिच्छिले ॥ रे जीवातीवबीभत्से। वपुषि प्रेम मा कृथाः ॥ १४ ॥

हे जीव! विष्टा, मूत्र, पसीनो, तथा मेलनी दुर्गंधथी भरेला, अने अत्यंत जुगुप्सा करवा लायक एवां आ शरीरप्रते तुं प्रीति न कर? ॥ १४ ॥

द्वे एव पुण्यपापाख्ये। जीवेन सह गच्छतः ॥ कृतघ्नं वपुरेतत्तु। किंचिन्नानुव्रजत्यपि ॥ १५ ॥

पुण्य अने पाप, एम बे पदार्थोज जीवनी साथे जाय छे, अने आ कृतघ्न शरीर तो किंचित्मात्र पण पाछळ जतुं नथी. ।१५।

याः सोढा नरके पूर्व-मत्युग्रा वेदनास्त्वया ॥ तासामसौ न लक्षांशे-ऽप्याग्नेयी वेदनास्ति ते ।१६।

वळी हे जीव! पूर्वे अति उग्र वेदनाओ जे तें नरकनी अंदर सहन करेली छे, तेना एक लाखमा भाग जेटली पण आ अग्निनी वेदना नथी. ॥ १६ ॥

**अन्वभूयंत तिर्यक्त्वे । यास्त्वयानेकशः पुरा ॥ ताः साक्षादिव तिर्यक्षु । पश्यन् पीडां सहाग्निजां ॥१७॥**

( वळी हे जीव! ) पूर्वे तिर्यंचपणामां अनेकवार जे पीडाओने तें भोगवेली छे, तेवी पीडाओने तिर्यंचोने विषे साक्षात् जोतोथको आ अग्निथी उत्पन्न थयेली पीडाने तुं सहन कर? ॥ १७ ॥

**मनुष्यः प्राप्तधर्मा च । यावज्जीवसि जीव हे ॥ प्रस्थानस्थोऽत्र सुमना-स्तावदर्हद्वचः स्मर ॥१८॥**

वळी हे जीव! प्रयाण माटे तैयार थयेलो तुं धर्मसहित मनुष्यरूपे ज्यांसुधी हैयात छो, त्यां सुधीमां शुभ मनथी श्रीवीतराग प्रभुना वचननुं स्मरण कर? ॥ १८ ॥

**एक उत्पद्यते जीवो । म्रियतेऽप्येक एव हि ॥ संसारेऽपि भ्रमत्येकः । प्राप्नोत्येकश्च निर्वृतिं ॥१९॥**

आ जीव एकलोज उत्पन्न थाय छे, एकलोज मरण पामे छे, संसारमां पण एकलोज भमे छे, तथा एकलोज मोक्ष पामे छे.॥१९॥

**ज्ञानश्रद्धानचारित्रा-ण्येवाहं श्रद्दधेऽधुना ॥ यावज्जीवमिनः सर्वे । व्युत्सृष्टा भवदोहदाः ॥ २० ॥**

वळी आ समये ज्ञान श्रद्धा (दर्शन) तथा चारित्रनेज हुं स्वीकारुं छुं, तथा सघळी सांसारिक इच्छाओने छेक जीवितपर्यंत वोसरावुं छुं. ॥ २० ॥

मया हिंसामृषावाद–स्तेयाब्रह्मपरिग्रहाः ॥ चतुर्विधोऽपि चाहारः । प्रत्याख्यातस्त्रिधाधुना ॥ २१ ॥

हवे में हिंसा, मृषावाद, चोरी, अब्रह्म, तथा परिग्रहने, तेमज चारे प्रकारना आहारोनां त्रिविधे एटले मन, वचन अने कायाथी प्रत्याख्यान कर्यां छे. ॥ २१ ॥

क्षमयामि सर्वान् जीवान् । सर्वे क्षाम्यंतु ते मयि ॥ मैत्री मे सर्वभूतेषु । वैरं मम न केनचित् ।२२।

वळी सर्व जीवोने हुं खमावुं छुं, अने ते सर्व जीवो मने क्षमा करो ? सर्व प्राणिओप्रते मारे मित्रभाव छे, तथा कोइ साथे पण मने हवे वैर नथी. ॥ २२ ॥

यान् मे जानंति सर्वज्ञा । अपराधाननेकधा ॥ आलोचयामि सर्वांस्तान् । साक्षीकृत्यार्हदादिकान् ।२३।

वळी सर्वज्ञप्रभुओ मारा जे अनेक प्रकारना अपराधोने जाणे छे, ते सर्व अपराधोनी श्रीवीतरागप्रभुआदिकोनी साक्षीए हुं आलोचना करुं छुं. ॥ २३ ॥

छद्मस्थो मूढचित्तो य–ज्जीवः स्मरति वा नवा ॥ प्रत्यहं तत्र सर्वत्रे–दानीं मिथ्यास्तु दुष्कृतं ।२४।

अज्ञानी हृदयवाळा तथा छद्मस्थ एवा आ जीवने ( पोते करेला अपराधोमानो जे कोइ अपराध आ समये ) याद होय अथवा न होय, ते सर्व अपराधोमाटे आ समये हुं मिथ्यादुष्कृत आपुं छुं. ॥ २४ ॥

स एवं दुष्कृतं निंदन् । सुकृतं चानुमोदयन् ॥ सिद्धिसोपानदेशीयं । चतुःशरणमाश्रितः ॥ २५ ॥

एवी रीते पोताना दुष्कृतोने निंदता, तथा सुकृतोने अनुमोदता थका ते चाणिक्ये मोक्षपुरीना पगथीयां सरखां अरिहंतआदिकनां चारे शरणोनो आश्रय कर्यो. ॥ २५ ॥

**सिद्धसाक्षिकमालोच्य। स्मरन् पंचनमस्कृतिं ॥ प्रतलीकृतदुःकर्मा । चाणिक्यः स्वर्गमीयिवान् ॥२६॥**

एवी रीते सिद्धोनी साक्षीए आलोचना लेइ पंच नमस्कारनुं स्मरण करतो थको पापोने पातळां करीने चाणिक्य स्वर्गे गयो. २६

**सुबंधुना नृपोऽन्येद्यु—र्व्यज्ञप्यत यथा मम ॥ देव प्रसीद चाणिक्य—वेश्मदानान्नृपोऽप्यदात् ॥२७॥**

त्यारबाद एक दिवसे ते सुबंधुए राजाने विनव्युं के, हे स्वामी! कृपा करीने मने हवे चाणिक्यनुं घर आपो? त्यारे राजाए पण तेने ते आप्युं. ॥ २७ ॥

**गतः सुबंधुस्तत्राथ । सर्वशून्ये गृहेऽखिले ॥ एकमेवापवरकं । पिहितद्वारमैक्षत ॥ २८ ॥**

पछी सुबंधु ज्यारे त्यां गयो त्यारे सर्व रीते उज्जड एवा ते आखा घरनी अंदर तेणे फक्त एकज ओरडो मजबूत रीते बंध करेलो दीठो. ॥ २८ ॥

**भविष्यत्यत्र सर्वस्व—मित्यसौ चिंतयंस्ततः ॥ द्वारमुद्घाटयामास । मंजूषां तत्र दृष्टवान् ॥ २९ ॥**

आ ओरडामां तेनुं सर्व द्रव्य हशे, एम विचारी तेणे तेनुं द्वार उघाड्युं, त्यारे तेमां तेणे एक पेटी दीठी. ॥ २९ ॥

**अरेऽस्यां साररत्नानि । भविष्यंतीति चिंतया ॥ भित्वा तालकमुद्घाट्या-पश्यद्गंधसमुद्गकं ॥ ३० ॥**

अरे! आ पेटीमां ( खरेखर ) अमूल्य रत्नो हशे, एम विचारी तेनुं तालुं भांगीने तेणे ते पेटी उघाडी, तो अंदर सुगंधि वस्तुओथी भरेलो एक डाबडो तेणे जोयो. ॥ ३० ॥

**हुं जाने बीजकान्यत्र । भावीनीति विभावयन् ॥ तमप्युद्घाट्य पश्यन्न-पश्यद्गंधान् सपत्रकान् ।३१।**

अरे! हवे में जाण्युं! आ डाबलामां ( द्रव्य माटेनां ) बीजक ( लखेली निशानीओ ) हशे, एम विचारी ते डाबलो उघाडीने जोतां तेमां तेणे पत्रसहित सुगंधि पदार्थो जोया. ॥ ३१ ॥

**ततोऽतिसुरभीन् गंधां-स्तानाघ्रायाथ पत्रकं ॥ वाचयन् ददृशे तत्र । गंधाघ्राणोत्तरक्रियां ॥ ३२ ॥**

पछी ते सुबंधुए ते सुगंधि द्रव्योने सुंघीने पत्र वांचतां थकां ते सुगंधि द्रव्योने सुंघवा पछीनी उत्तरक्रिया जोइ. ॥३२॥

**एतानाघ्राय यो गंधान् । जलं पिबति शीतलं ॥ भुंक्ते सर्वरसं भोज्य-मधःकृतसुधं सुधीः ॥३३॥**

आ सुगंधि पदार्थो सुंघ्याबाद जे कोइ बुद्धिवान माणस ठंडुं ( उकाळ्या विनानुं ) जल पीशे, तथा अमृतने पण तुच्छ करनारुं षट्रस भोजन करशे, ॥ ३३ ॥

**कर्पूरकुसुमादीनां । गंधं सुरभि जिघ्रति ॥ निरूपयति रूपाणि । मनोहारीणि सस्पृहः ॥ ३४ ॥**

तथा कपूर पुष्पआदिकोनी मनोहर सुगंधि सुंघशे, तेमज लालचयुक्त थइ मनोहर स्वरूपो जोशे, ॥ ३४ ॥

वीणावेणुरवोन्मिश्राः । शृणुते कलगीतिकाः ॥ सविलासांगनासंग-लालसो बोजवीति च ॥ ३५ ॥

तथा वीणा, अने वांसलीनां नादयुक्त मनोहर गायनो सांभळशे, तेमज विलासयुक्त स्त्रीना संगनी इच्छा करशे, ॥ ३५ ॥

किं बहूक्तेन पंचानां । विषयाणां मनोरमं ॥ भजत्येकमपि क्षिप्रं । जायते स यमातिथिः ॥ ३६ ॥

वधारे शुं कहेवुं? ते पांचे विषयोमाना एक पण मनोहर विषयने जे भोगवशे, ते तुरत मृत्यु पामशे. ॥ ३६ ॥

यस्तु मुंडितमुंडास्यः । प्रांताशी मलिनांशुकः ॥ अस्नानी मुनिवृत्त्यैव । वर्ततेऽत्र स जीवति ॥ ३७ ॥

परंतु जे पोतानां मस्तक तथा डाढी मुंडावीने, अनिष्ट भोजन करतोथको, मलीन वस्त्रो पहेरीने, स्नानरहित थयोथको, मुनिना आचरणथी रहेशे, तेज जीवी शकशे. ॥ ३७ ॥

तदर्थप्रत्ययायाथ । नरः कश्चित्सुबंधुना ॥ गंधानाघ्राय सर्वाङ्ग-सौख्यैरायोजितो मृतः ॥ ३८ ॥

पछी आ हकीकतनी खात्रीमाटे ते सुबंधुए कोइक पुरुषने ते सुगंधिओ सुंघाडीने, सर्व विषयोमां जोडवाथी ते पुरुष मरण पाम्यो. ॥ ३८ ॥

सोऽथ दध्यौ धियं धिङ्मे । धीमांश्चाणिक्य एव हि ॥ यन्मृतेनापि येनाह-मेवं जीवन्मृतः कृतः । ३९ ।

पछी ते सुबंधुए विचार्युं के, मारी बुद्धिने धिक्कार थाओ! खरेखर चाणिक्यज बुद्धिमान हतो, के जेणे मरतां मरतां पण मने आवी रीते जीवते मुओ कर्यो छे. ॥ ३९ ॥

**मुनिवेषस्ततः स्थित्वा । नटवद्भाववर्जितः ॥ अनव्यः पातकी सोऽथ । भवेऽनंते भ्रमिष्यति ॥४०॥**

पछी ते सुबंधु भावरहित नटनी पेठे मुनिवेषे रह्यो, तथा ते अभवी पापिष्ट सुबंधु अनंता भवोमां भटकशे. ॥ ४० ॥

**राज्ञश्च बिंदुसारस्य । कुर्वतो राज्यमुज्ज्वलं ॥ पृथिवीतिलकाख्याया । महादेव्याः सुतोऽभवत् ॥४१॥**

हवे निर्मल राज्य करता एवा ते बिंदुसार राजाने पृथिवीतिलका नामनी पट्टराणीथी एक पुत्र थयो. ॥ ४१ ॥

**सच्छायः सुमनोरम्यः । सदालिप्रियतां गतः ॥ अशोकश्रीरशोकश्रीः । कौतुकं सफलोदयः ॥ ४२ ॥**

मनोहर रूपवाळो ( पक्षे-उत्तम छायावाळो ) सज्जनोने आनंद आपनारो ( पक्षे-पुष्पोथी मनोहर ) सज्जनोनी श्रेणिने प्रिय थइ पडेलो ( पक्षे-हमेशां भमराओने प्रिय लागतो) एवो ते अशोकश्री नामनो बिंदुसारनो पुत्र अशोकवृक्षनी शोभा धारण करतो हतो, परंतु एटलुं आश्चर्य के, ते अशोकश्रीकुमार सफल उदयवाळो ( पक्षे-फळोना उदयवाळो ) हतो. आश्चर्य एटला-माटे के, अशोकवृक्षमां फळ थतां नथी. ॥ ४२ ॥



**सोऽथाधीयन्नविश्रांतः । संक्रांतनवयौवनः ॥ यौवराज्यपदे राज्ञा । विहितो गुणवानिति ॥ ४३ ॥**

पछी ते अशोकश्रीकुमार निरंतर अभ्यास करतोथतो नवयौवनयुक्त थयो, त्यारे राजाए तेने गुणवान जाणीने युवराजनी पदवीपर स्थापन कर्यो. ॥ ४३ ॥

**क्रमादुपरते राज्ञि । सामंतसचिवादिभिः ॥ स एव स्थापितो राज्ये । राज्यधूर्वहनक्षमः ॥ ४४ ॥**

अनुक्रमे ते बिंदुसार राजाना मरणबाद सामंत, मंत्रिविगेरेए मळीने राज्यनी धोंसरीने धारण करवामां समर्थ एवा तेज अशोकश्रीकुमारने राज्यपर स्थापन कर्यो. ॥ ४४ ॥

**कुणाल इति तस्यापि । तनुभूः पुण्यभूरभूत् ॥ जातमात्रोऽपि यः पित्रा । युवराजपदे कृतः ॥ ४५ ॥**

तेनो पण कुणाल नामनो पुण्यशाली पुत्र थयो, के जेने जन्मतांज तेना पिताए युवराजपदवीपर स्थापन कर्यो. ॥ ४५ ॥

**माभूद्विमात्रकस्यास्य । विमातृभ्योऽत्र किंचन ॥ इत्यालोच्य च भूपालः । कुणालं पुत्रवत्सलः ।४६।**

**चतुरंगचमूयुक्तं । प्रधानामात्यसंगतं ॥ कुमारं भुक्तिदत्ताया-मवंत्यां प्रैषयत्पुरि ॥ ४७ ॥ युग्मं ॥**

मा विनाना आ कुणालकुमारने सावकी माताओ तरफथी कंइ ( उपद्रव ) न थाय तो ठीक, एम विचारीने ते पुत्र तरफ प्रेमवाला राजाए ते कुणाल कुमारने चतुरंगी सेना सहित, प्रधान मंत्रिनी साथे तेने गरासमां आपेली अवंती नगरीमां मोकलावी दीधो. ॥ ४६ ॥ ४७॥

**स्नेहातिशयतस्तत्र । भूपतिः प्रतिवासरं ॥ स्वहस्तलिखितान् लेखान् । प्रहिणोतिस्म सादरं ॥४८॥**

अतिशय स्नेहने लीधे राजा हमेशां आदर सहित पोताने हाथे कागळो लखीने तेने त्यां मोकलतो हतो. ॥ ४८ ॥

ज्ञात्वान्येद्युः कलायोग्यं । कुमारं मंत्रिणंप्रति ॥ अधीयतान्नः पुत्रोऽय–मिति लेखेऽलिखन्नृपः ॥४९॥

पछी एक वखते ते कुणालकुमारने कलाभ्यास करवा योग्य जाणीने राजाए त्यां मंत्रिने कागळमां लख्युं के, अमारा ते पुत्रने तमारे ( अधीयतात् ) कलाभ्यास कराववो. ॥ ४९ ॥

अनुद्रानाक्षरं तं चा–संवृत्यैव महीपतिः ॥ तत्रैव स्थानके मुक्त्वा । गतवान् देहचिंतया ॥५०॥

एवी रीते खुल्ला अक्षरोवाळा ते कागळने बंध कर्याविनाज त्यां मूकीने राजा देहचिंता माटे गयो. ॥ ५० ॥

राज्ञी काचिच्च तं दृष्ट्वा । दध्यौ कस्य कृते स्वयं ॥ लेखं लिखति राजेंदु–रेवमत्यंतमादृतः ॥५१॥

ते कागळने जोइने कोइक राणी विचारवा लागी के, राजा पोते अत्यंत आदरथी कोने आवी रीते कागळ लखे छे? ॥५१॥

ततस्तं वाचयित्वा सा । राज्यमिच्छुः स्वसूनवे ॥ दत्वा बिंदुमकारस्य । तथैव तमतिष्टिपत् ॥५२॥

पछी ते कागळ वांचीने पोताना पुत्रने राज्य इच्छनारी ते राणीए ( अधीयतात् शब्दना पहेला ) अकारपर बिंदु करीने ते कागळ तेवीज रीते त्यां राखी दीधो. ॥ ५२ ॥

अथेयुषा नरेंद्रेण । कथंचिद्व्यग्रचेतसा ॥ संवृत्याप्रतिवाच्यैव । लेखः प्रैषि विमुद्र्य च ॥ ५३ ॥

पछी राजाए आवीने कंइक कारणथी उतावळने लीधे ते कागळ फरीने वांच्याविना वींटीने, तथा बंध करीने मोकलावी आप्यो. ॥ ५३ ॥

**कुमारोऽपि समासाद्य । तं वाचयितुरार्पयत् ॥ वाचयित्वा मनस्येव । स तु मौनेन तस्थिवान् ।५४।**

पछी ते कागळ मळवाथी कुणालकुमारे वांचनारा ( मंत्रिने ) आप्यो, त्यारे वांचीने ते मंत्री तो पोताना मनमां मौन धारण करी रह्यो. ॥ ५४ ॥

**अथोच्यत कुमारेण । किं न वाचयसि द्रुतं ॥ तथाप्यजल्पतस्तस्मात् । स्वयमादाय वाचितः ।५५।**

त्यारे ते वांचनारा मंत्रीने कुमारे कह्युं के, अरे! तुं कागळ केम तुरत वांचतो नथी? तोपण मौन रहेला एवा ते मंत्रि पासेथी कागळ लेइने कुमारे पोते वांची जोयो. ॥ ५५ ॥

**अंधीयतान्नः पुत्रोऽय-मित्यालोक्याह वाहकान् ॥ मौर्यवंशभुवां राज्ञां । नाज्ञा केनाप्यखंड्यत ।५६।**

अमारा आ पुत्रने " अंधीयतात् " एटले " आंधळो करजो, " एवा समाचार ते कागळमां जोइने तेणे मंत्रीओने कह्युं के, मौर्यवंशना राजाओनी आज्ञा कोइये पण खंडित करी नथी. ॥ ५६ ॥

**तल्लेखार्थं करिष्येऽहं । मंत्रिणोऽथ तमभ्यधुः ॥ कार्यं देव पुनर्दृष्ट्वा । स ऊचे किं विमर्शने ।५७।**

माटे आ पत्रमां लख्या मुजब हुं करीश. त्यारे मंत्रिओए तेने कह्युं के, हे स्वामी! विचार करीनेज कार्य करवुं, त्यारे कुणालकुमारे कह्युं के, हवे विचारवानी शी जरुर छे? ॥ ५७ ॥

इत्युक्त्वा सहसैवासौ । सुतप्तायःशिलाकया ॥ जवितव्यतयैवोक्तः । स्वयमानंज चक्षुषी ॥ ५८ ॥

एम कहीने जाणे भाविभावथी प्रेरायो होय नही? तेम ते कुणालकुमारे तुरतज अतितपावेली लोखंडनी शळीथी पोतानी बन्ने आंखोमां अंजन कर्युं. ॥ ५८ ॥

तच्चाकर्ण्य नृपः सद्यः । पतितो दुःखसागरे ॥ चिंतयामास धिगहो । दुर्गमं दैववल्गितं ॥ ५९ ॥

ते सांभलीने राजा तुरत दुःखरूपी समुद्रमां पड्यो, अने विचारवा लाग्यो के, अहो! अगम्य एवां दैव कार्यने धिक्कार थाओ? ॥ ५९ ॥

अन्यथा चिंत्यते हर्षो-च्चालमूर्छालमानसैः ॥ जायते चान्यथा सैष । कार्यारंजो विधेर्वशात् ।६०।

हर्षना आवेशथी विह्वल मनवाला माणसो कार्य करवानुं अन्य प्रकारे चिंतवे छे, त्यारे तेज कार्यनो प्रारंभ दैवना प्रबलपणाथी तेथी विपरीत थाय छे. ॥ ६० ॥

यदेव कुरुते दैवं । तदेव जवति ध्रुवं ॥ इदं करिष्यते नेद-मिति चिंता वृथा नृणां ॥ ६१ ॥

माटे जे दैव करे छे, तेज खरेखर थाय छे, आ हुं करीश, आ हुं नही करुं, एवी रीतनो माणसोनो विचार नकामो छे. ६१

ततस्तस्य ददौ ग्रामं । राज्यमंधो हि नार्हति ॥ दत्तमुज्जयिनीराज्यं । तद्धिमातृसुतस्य तत् ॥६२॥

त्यारबाद राजाए ते कुणालकुमारने एक गाम आप्युं, केमके अंधकुमार राज्यने लायक होतो नथी, अने तेनी सावकी माताना पुत्रने उज्जयिनीनुं राज्य आप्युं. ॥ ६२ ॥

पारंपर्येण च ज्ञात्वा । तद्धिमातृविजृंभितं ॥ कुणालो हृदये दायान् । दत्ते धृष्टः करोमि किं ॥६३॥

पछी अनुक्रमे ते सावकी मातानुं कारस्थान जाणीने कुणाल मनमां दुःख पामवा लाग्यो के, लुचाइथी तेणीए मने ठग्यो, हवे शुं करुं.? ॥ ६३ ॥

अथ तत्र स्थितो ग्रामे । निःकर्माल्पपरिच्छदः ॥ गीतप्रसक्त्या देवस्य । दिवसानस्ति पूरयन् ।६४।

हवे ते गामडामां रहेलो ते कुणालकुमार कंइपण कार्यविना स्वल्पपरिवारसहित देवकीर्तन गावामां आसक्त रहीने पोताना दिवसो पूर्ण करवा लाग्यो. ॥ ६४ ॥

अत्रांतरे स रंकात्मा । तावद्धर्मप्रभावतः ॥ गर्भे कुणालभार्यायाः । समुत्पेदे स्फुरत्श्रियः ॥६५॥

एवामां ते रंकनो जीव तेवी रीतना धर्मना प्रभावथी स्फुरायमान कांतिवाळी कुणालनी स्त्रीना गर्भमां उत्पन्न थयो. ।६५।

मासद्वयव्यतिक्रांते देवगुर्वादिपूजने ॥ अभवद्दोहदस्तस्याः । कुणालेन च पूरितः ॥ ६६ ॥

बे मास वीत्याबाद तेणीने देवगुरु आदिकनां पूजननो दोहलो उत्पन्न थयो, तथा कुणाले ते संपूर्ण कर्यो. ॥ ६६ ॥

तनयं जनयामास । पूर्णेष्वथ दिनेषु सा ॥ वर्धितः प्रियदास्या च । कुणालः पुत्रजन्मना ॥ ६७ ॥

पछी संपूर्ण दिवसोए तेणीए पुत्रने जन्म आप्यो, त्यारे प्रिय एवी दासीए कुणालने ते पुत्रजन्मनी वधामणी आपी. ६७

ततो विमातुर्विफलं । करोम्येष मनोरथं ॥ गृह्णामि तन्निजं राज्य-मिति ध्यात्वा तदैव सः ॥ ६८ ॥

कुणालो निर्ययौ ग्रामात् । पाटलीपुत्रमासदत् ॥ अगायत्तत्र गोष्ठ्यां च । राजमार्गसमीपगः । ६९ । युग्मं ।

हवे मारी सावकी माताना मनोरथने निष्फल करुं, अने मारुं ते राज्य ग्रहण करुं एम विचारीने ते कुणाल तेज वखते ते गामडांमांथी निकळीने पाटलीपुत्र नगरमां आव्यो, तथा त्यां राजमार्गनी पासे बेशीने एकठा थता लोकोनी मंडलीमां गावा लाग्यो. ॥ ६८ ॥ ६९ ॥

तस्यातिस्वरसौंदर्य-रश्मिनेव नियंत्रितः ॥ तत्र यो यः संचचार । निःप्रचारः स सोऽभवत् ॥ ७० ॥

तेना स्वरना अत्यंत मनोहरपणारूपी दोरीथी जाणे बंधाइ गया होय नही? तेम जे जे माणस ते रस्ते जतो हतो, ते ते माणस त्यांज स्थिर थइ उभतो. ॥ ७० ॥

रंजितस्तद्गुणैः सर्वैः । शशंसैकमुखो जनः ॥ हाहाहूहूप्रभृतिका-नमंस्तास्यैव शिष्यकान् ॥ ७१ ॥

एवी रीते तेनी गायनकलाना गुणोथी खुशी थयेला सर्व कोइ लोको एकी जीभे तेनी प्रशंसा करवा लाग्या, तथा हाहाहूहूआदिक देव गंधर्वोने तो तेना शिष्यो मानवा लाग्या. ॥ ७१ ॥

**अभवत्तद्गुणोल्लापः । सभायां भूपतेरपि ॥ आजूहवत्तं राजापि । कौतुकं कस्य नाद्भुते ॥ ७२ ॥**

पछी राजानी सभामां पण तेना गुणोनी प्रशंसा थइ, त्यारे राजाए पण तेने बोलाव्यो, केमके कौतुक कोने आश्चर्य करावतुं नथी? ॥ ७२ ॥

**सोऽप्यथागत्य राजाग्रे । जवन्यंतरितो जगौ ॥ राजानो येन पश्यंति । नांगिनो विकलांगकान् ॥ ७३ ॥**

पछी ते राजानी पासे आवीने पडदानी अंदर रही गावा लाग्यो, केमके राजाओ हीन अंगवाळां माणसोने प्रत्यक्ष नजरे जोता नथी. ॥ ७३ ॥

**तस्यातिशायिना तेन । तुष्टो गीतेन गोपतिः ॥ वृणु वरं त्वमूचे तं । सोऽपि गीत्यैव गीतवान् ॥ ७४ ॥**

पछी तेना अतिमनोहर गायनथी खुशी थयेला राजाए तेने कह्युं के, तुं वरदान माग? त्यारे ते पण गायनमांज गावा लाग्यो के, ॥ ७४ ॥

**प्रपौत्रश्चंद्रगुप्तस्य । बिंदुसारस्य नप्तृकः ॥ अशोकश्रीतनूजोंधः । काकिणीमेष याचते ॥ ७५ ॥**

चंद्रगुप्तनो प्रपौत्र, बिंदुसारनो पौत्र, अने अशोकश्रीनो पुत्र एवो आ कुणाल नामनो अंधपुत्र काकिणी (कोडी) मागे छे. ७५

तत् श्रुत्वा मुंचताश्रूणि । जवनीमपनीय तां ॥ कुणालमंकमारोप्य । प्रोचेऽल्पं वत्स याचितं ॥ ७६ ॥

ते सांभळी आंखोमां अश्रुओ लावता एवा ते राजाए ते पडदो दूर करी, कुणालने खोळामां बेसाडी कह्युं के, हे वत्स! तें तो घणुंज स्वल्प माग्युं. ॥ ७६ ॥

अथोचुर्मंत्रिणस्तत्र । नास्त्यल्पं देव याचितं ॥ राज्यं हि राजपुत्राणां । काकिणीत्यभिधीयते ॥ ७७ ॥

त्यारे त्यां मंत्रिओ बोली उठ्या के हे स्वामी! आ कुमारे कंइ स्वल्प माग्युं नथी, केमके राजपुत्रोनी जे काकिणी ते राज्य कहेवाय छे. ॥ ७७ ॥

राज्ञोचे राज्यमस्यैव । संकल्पितमभून्मया ॥ परं दैवमभूद्वामं । तत्कथं दीयतेऽस्य तत् ॥ ७८ ॥

त्यारे राजाए कह्युं के, में (प्रथमथीज) आ कुणालकुमारने राज्य आपवानो निश्चय कर्यो हतो, परंतु दैव उलटुं थयुं तो हवे तेने राज्य केम अपाय? ॥ ७८ ॥

कुणालः स्माह मत्पुत्र–स्तात राज्यं करिष्यति ॥ राजावोचत्कदाभूत्ते । पुत्रः स स्माह संप्रति ॥ ७९ ॥

त्यारे कुणाले कह्युं के, हे पिताजी! मारो पुत्र राज्य करशे, त्यारे राजाए कह्युं के, तने पुत्र क्यारे थयो? तेणे कह्युं के, "संप्रति" एटले हमणांज थयो छे. ॥ ७९ ॥

संप्रतीत्यभिधां तस्य । ततश्चक्रे तदैव राट् ॥ दशाहानंतरं तं चा–नाय्य राज्यं निजं ददौ ॥ ८० ॥

पछी राजाए तेज वखते तेनुं "संप्रति" नाम पाड्युं, तथा दश दिवसोबाद तेने तेडावीने पोतानुं राज्य आप्युं. ।८०।

गतः क्रमात्परां प्रौढिं । भरतार्धमसाधयत् ॥ अप्यनार्यान् जनपदान् । स्ववशीकुरुतेस्म सः ॥ ८१ ॥

पछी ते संप्रतिराजाए अनुक्रमे विशाल आबादी मेळवीने अर्धो भरतखंड साध्यो, तथा अनार्यदेशोने पण जीतीने पोताने ताबे कर्या. ॥ ८१ ॥

संप्रतेः साधिताशेष–क्षोणीचक्रस्य चक्रिवत् ॥ उज्जयिन्यामुज्जयिन्यां । पुर्यामाजग्मुषोऽन्यदा ॥ ८२ ॥

जीवंतस्वामिप्रतिमां । नंतुं संयमयात्रया ॥ आजग्मतुः क्रमादार्यौ । महागिरिसुहस्तिनौ ॥ ८३ ॥ युग्मं ।

चक्रीनीपेठे समस्त पृथ्वीवलयने जीतीने एक वखते जयवंती एवी उज्जयिनी नगरीमां ज्यारे ते संप्रति राजा आव्यो, त्यारे श्रीआर्यमहागिरि तथा आर्यसुहस्ति आचार्यो पण अनुक्रमे संयमयुक्त विहार करताथका जीवंतस्वामिनी (श्रीवीरप्रभुनी) प्रतिमाने वांदवामाटे त्यां पधार्या. ॥ ८२ ॥ ८३ ॥

तदानीं चांतरंगारीन् । जिगीषोरिव निर्ययौ ॥ स्वनन्निस्वानवद्याद्यै–र्जीवंतस्वामिनो रथः ॥ ८४ ॥

ते वखते जाणे (कषायोरूपी) अंतरंग शत्रुओने जीतवा जवानी इच्छावाळा होय नही? एवो ते जीवंतस्वामिनो रथ वाजित्रोना विविध प्रकारना मनोहर नादो साथे निकळ्यो. (अर्थात् प्रभुनी रथयात्रानो वरघोडो निकळ्यो.) ॥ ८४ ॥

महागिरिसुहस्तिभ्यां । संघेन च परिस्कृतः ॥ पुर्यामस्खलितः स्वैरं । भ्राम्यन् प्राकाम्यसिद्धिवत् ॥८५॥

आजगाम नरेंद्रस्य । सौधद्वारं महोत्सवैः ॥ गवाक्षस्थः क्षितीशोऽपि । प्रैक्षतार्यसुहस्तिनं ।८६। युग्मं ।

आर्यमहागिरि तथा आर्यसुहस्ति, अने सर्व संघवडे वींटायेलो ते रथ इच्छित सिद्धनीपेठे कंई पण अटकावविना स्वेच्छामुजब नगरीमां फरतोथको महोत्सवपूर्वक राजाना मेहेलना दरवाजापासे आव्यो, त्यारे झरूखामां बेठेला ते संप्रतिराजाए आर्यसुहस्ति महाराजने जोया. ॥ ८५ ॥ ८६ ॥

दध्यावालोक्य तं चैवं । क्वाप्येनं दृष्टपूर्व्यहं ॥ परं दृष्टचरः कुत्रे-त्यामृशन् मूर्छयापतत् ॥ ८७ ॥

एवी रीते तेमने जोइने ते राजाए विचार्युं के, में आमने पूर्वे क्यांक पण जोया छे, परंतु क्यां जोया छे? एम विचारतो राजा मूर्छा आववाथी पडी गयो ॥ ८७ ॥

अथासन्नैः परिजनैः । स सिक्तश्चंदनादिभिः ॥ वीजितस्तालवृंताद्यैः । स्मृतप्राग्जातिरुत्थितः ।८८।

पछी नजीक रहेलां माणसोए तेने चंदन आदिक छांटयुं, तथा पंखाविगेरेथी पवन नाख्यो, तेथी ते जातिस्मरण ज्ञान पामीने बेठो थयो. ॥ ८८ ॥

ततस्तदैव तं ज्ञात्वा । स प्राग्भवगुरुं सुधीः ॥ गत्वा तत्रानमद्भक्त्या । पप्रच्छ च कृतांजलिः ॥८९॥

पछी तेज वखते आर्यसुहस्ति महाराजने पोताना पूर्व भवना गुरु जाणीने उत्तम बुद्धिवाळो ते संप्रति राजा त्यां जइ भक्तिपूर्वक तेमने नम्यो, तथा हाथ जोडीने पूछवा लाग्यो के, ॥ ८९ ॥

**किं फलं भगवन्नर्ह–द्धर्मकल्पमहीरुहः ॥ अवोचंस्ते फलं राजन् । लाभः स्वर्गापवर्गयोः ॥ ९० ॥**

हे भगवन्! श्रीअरिहंतप्रभुना धर्मरूपी कल्पवृक्षनुं शुं फल छे? त्यारे तेमणे कह्युं के, हे राजन्! स्वर्ग तथा मोक्षनी प्राप्तिरूप तेनुं फल छे. ॥ ९० ॥

**पुनरूचे स किं पूज्या । अव्यक्तव्रतजं फलं ॥ गुरवोऽप्यभ्यधुर्भूप । भूपतित्वादिकं फलं ॥ ९१ ॥**

वळी फरीने तेणे कह्युं के, हे पूज्य! अव्यक्त सामायिकरूप व्रतनुं शुं फल छे? त्यारे गुरुमहाराजे कह्युं के, हे राजन्! भूमिपतिपणाआदिकरूप तेनुं फल छे. ॥ ९१ ॥

**ततः प्रत्ययितो राजा–वोचज्जानीत मां न वा ॥ गुरुः श्रुतोपयोगेन । विज्ञाय नृपमभ्यधात् ॥९२॥**

पछी खात्री थवाथी राजाए कह्युं के, हे भगवन्! आप मने ओळखो छो? के नही? त्यारे श्रुतोपयोगथी जाणीने गुरुए राजाने कह्युं के, ॥ ९२ ॥

**सुष्टूपलक्षयामस्त्वां । शिष्यो नः प्राग्भवे भवान् ॥ ततो हर्षप्रकर्षेण । वंदित्वा सोऽवदद्गुरून् ॥९३॥**

अमो तने सारी रीते ओळखीयें छीयें, तुं पूर्व भवमां अमारो शिष्य हतो. ते सांभळी अत्यंत हर्षित थयेला ते संप्रतिराजाए गुरुमहाराजने वांदीने कह्युं के, ॥ ९३ ॥

**भवभ्रमपरिश्रांत–जंतुविश्रामपादप ॥ कारुण्यामृतजीमूत । श्रुतरत्नमहानिधे ॥ ९४ ॥**

**तदानीं यदि मे स्वामिन् । नाकरिष्यत्कृपां भवान् ॥ ततोऽहं क्षुत्पिपासार्त्या ऽगमिष्यं क्वापि दुर्गतौ ॥ ९५ युग्मं**

संसारमां भ्रमण करवाथी थाकी गयेला प्राणिओने विश्राममाटे वृक्षसरखा, तथा करुणारूप अमृतना मेघसरखा, अने श्रुतरूपी रत्नोना महानिधानसरखा एवा हे भगवन्! ते वखते आपे जो मारापर कृपा करी न होत तो, क्षुधा अने तृषानी पीडाथी ( आर्त्तध्यानयुक्त मरीने ) कोइ दुर्गतिमां हुं गयो होत. ॥ ९४ ॥ ९५ ॥

**भवत्पादप्रसादेन । साम्राज्यमिदमद्भुतं ॥ प्राप्तं स्वामिन् मयेदानीं । यत्कर्तव्यं तदादिश ॥ ९६ ॥**

वळी हे स्वामी ! आपना चरणोनी कृपाथी आ अद्भुत साम्राज्य मने प्राप्त थयुं छे, तो हवे मने करवालायक योग्य कार्य फरमावो ? ॥ ९६ ॥

**ततो गुरुभिराचक्षे । जैनधर्मफलं त्वया ॥ साक्षाच्चक्रे स्वयं वत्स । तत्तत्रैवादरं कुरु ॥ ९७ ॥**

त्यारे गुरुमहाराजे तेने कह्युं के, हे वत्स! जैनधर्मनुं फल तें पोतेज साक्षात् अनुभव्युं छे, माटे ते जैनधर्मनेविषेज तुं आदर कर? ॥ ९७ ॥

ततः सम्यक्त्वमूलं स । श्राद्धधर्मं प्रपेदिवान् ॥ तरीतुं भवपाथोधिं । सुश्वेतपटपोतवत् ॥ ९८ ॥

पछी ते संप्रतिराजाए संसाररूपी समुद्रने तरवाने उत्तम श्वेत सढवाळा वहाणनीपेठे सम्यक्त्वमूल श्रावकधर्म स्वीकार्यो. ।९८।

अर्चतिस्मार्हतामर्हीन् । पूजयाष्टप्रकारया ॥ उपास्तेस्म गुरून् व्याख्या-रसपानैकलालसः ॥ ९९ ॥

पछी ते संप्रतिराजा अष्टप्रकारी पूजावडे श्रीअरिहंतप्रभुना चरणोने पूजतो हतो, तथा धार्मिक व्याख्यानना रसनेज पीवाने उत्सुक थयोथका ते गुरुमहाराजनी उपासना करवा लाग्यो. ॥ ९९ ॥

ददौ दानमनिर्विघ्नः । संघमार्चयदर्हतां ॥ प्रावर्तयच्च सर्वत्र । प्रतिबोध्य कृपां नृपः ॥ ४०० ॥

वळी कंइ पण संकोचविना ते संप्रतिराजा दान देवा लाग्यो, तथा श्रीवीतरागप्रभुना संघने पूजवा लाग्यो, अने (लोकोने) प्रतिबोधीने सर्व जगोए दया धर्मनो फेलावो करवा लाग्यो. ॥ ४०० ॥

प्रतिग्रामं प्रतिपुरं । चैत्यैस्तत्कारितैस्तदा ॥ बभूव भूमिः सर्वांग-मुक्तामयविभूषणा ॥ १ ॥

ते वखते दरेक गाम, तथा दरेक शेहेरोमां तेणे करावेलां जिनमंदिरोथी पृथ्वी सर्व शरीरे मोतीमय आभूषणोवाळी थइ. ।१।

अभूवन्नार्हताः सर्वे । तदा मिथ्यादृशोऽपि हि ॥ यतो राजानुगो लोकः । स्फातिः पुण्यानुगा यथा ।२।

ते वखते सघळा मिथ्यात्वी लोको पण जैनधर्मी थया, केमके कीर्ति जेम पुण्यने अनुसरे छे, तेम लोको पण राजाने अनुसरे छे. ॥ २ ॥

सुसाधुश्रावकेणाथ । प्रतिबोधयितुं तदा ॥ अपि प्रत्यंतनृपाला-स्तेन सर्वेऽपि शब्दिताः ॥ ३ ॥

पछी ते संप्रति राजाए ते वखते आसपासना बीजा सघळा राजाओने प्रतिबोधवामाटे उत्तम साधुसरखा श्रावको मारफते (पोतानी पासे) बोलाव्या. ॥ ३ ॥

आयाताश्च स्वयं राज्ञा । धर्ममाख्याय विस्तरात् ॥ तेऽपि प्रग्राह्य सम्यक्त्वं । श्रमणोपासकाः कृताः ॥४॥

पछी ज्यारे तेओ आव्या त्यारे राजाए पोते तेओने विस्तारथी धर्म संभळावीने समकीत लेवरावी श्रावको कर्या. ॥४॥

तथैव तस्थुषां तेषां । विहृत्य समयांतरे ॥ महागिरिः सुहस्ती च । पुनस्तत्रेयतुर्गुरू ॥ ५ ॥

एवी रीते ते सर्वे राजाओ ज्यारे ते उज्जयिनीमां रह्या हता, त्यारे केटलेक समये विहार करीने श्री आर्यमहागिरिजी तथा आर्यसुहस्तीजी गुरुमहाराज पण पाछा त्यां पधार्या. ॥ ५ ॥

चैत्ययात्रा तदा चक्रे । उज्जयिन्यां महाजनैः ॥ अनंतरं च प्रारेभे । रथयात्रामहोत्सवः ॥ ६ ॥

ते वखते उज्जयिनी नगरीमां महाजनोए जिनचैत्योनी यात्रा करी, तथा त्यारबाद रथयात्राना महोत्सवनो प्रारंभ कर्यो ६

तदा संप्रतिसाम्राज्ये । जिनधर्मे महौजसि ॥ विनिर्ययौ रथः स्थाना-न्महिम्नातिमहीयसा ॥ ७ ॥

ते वखते संप्रतिराजाना राज्यमां जिनधर्मनी घणीज उन्नति थवाथी (श्रीतीर्थंकर प्रभुनो) रथ महोटा महोत्सवपूर्वक तेना स्थानथकी निकळ्यो. ॥ ७ ॥

पुष्पितारामवत्पुष्पैः । फलौघैः कल्पवृक्षवत् ॥ महार्घ्यापण इव । परिधापनिकाशतैः ॥८॥
रणतूर्यायितैर्वाद्यै-र्व्योम व्यामोहयन्निव ॥ गृहे गृहेऽपि पूजार्घं । गृह्णानो मांगलिक्यवत् ॥ ९ ॥
सोल्लासरासकासक्त-स्त्रैणहल्लीसकः पुरः ॥ परितः स्फारशृंगारै-र्गीयमानोंगनाजनैः ॥ १० ॥
विलासिनीकरोत्क्षिप्तै-र्वीज्यमानश्च चामरैः ॥ जंजारिकुंजर इव । प्रेक्ष्यमाणः स्मितैर्नरैः ॥ ११ ॥
इत्वं निरुपमोत्साह-प्रीताखिलनरामरः ॥ आगादुपनृपावास-द्वारं जैनो महारथः १२ षड्भिः कुलकं ॥

खीली नीकळेला बगीचानीपेठे पुष्पोवडे, कल्पवृक्षनीपेठे फलोवडे, मनोहर वस्त्रोनी दुकाननी पेठे सेंकडोगमे वस्त्रोनी पहेरामणीओथी, तथा आकाशमां गर्जारव थतो होय नही? एवां रणसंग्राममां वागतां वाजित्रोवडे सत्कारयुक्त थयेलो, तथा मंगलिकवस्तुनीपेठे घेर घेर पूजनपणुं पामतो, तथा जेनी आगळ उल्लाससहित रास रमती स्त्रीओनुं नृत्य थइ रह्युं छे एवो, अने जेनी आसपास मनोहर आभूषणो आदिकना शृंगारवाळी स्त्रीओ गीतो गाइ रहेली छे एवो, स्त्रीओने हाथे वींझातां चामरोवाळो, जाणे इंद्रनो हाथी ऐरावण होय नही? एम खुशी थता पुरुषोथी जोवातो, अने अनुपम उत्साहवडे सर्व मनुष्यो तथा देवोने आनंद उपजावनारो ते श्री जिनेश्वर प्रभुनो महान् रथ एवी रीते चालतोथको राजाना मेहेलना दरवाजा पासे आवी पहोंच्यो.
॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

तत्रागत्य स्वयं राजा । समं सामंतपार्थिवैः ॥ तं पूर्णविधिनाऽभ्यर्च्य । पुष्पाण्यग्रे प्रकीर्य च ॥ १३ ॥
महाप्रभावनां कुर्व—स्तमनुव्रज्य संप्रतिः ॥ तेषां राज्ञां विधिं सर्वं । दर्शयित्वागमद्गृहं ।१४। युग्मं।

त्यारे त्यां संप्रतिराजा पोते सामंतो तथा ते सर्व राजाओ साथे आवीने, तथा ते रथने संपूर्ण विधिपूर्वक पूजीने, अने तेनी आगळ पुष्पो विखेरीने महान् प्रभावना करतोथको ते रथनी पाछळ जइने ते आवेला राजाओने सर्व प्रकारनी विधि बतावीने पछी पोताना मेहेलमां गयो. ॥ १३ ॥ १४ ॥

ततः स तान् नृपान् स्माह । न नः कार्यं धनेन वः ॥ मन्यध्वे स्वामिनं चेन्मां । तद्भवंतोऽपि संप्रति १५
धर्मं प्रवर्तयंत्वेनं । लोकद्वयसुखावहं ॥ स्वस्वदेशेषु सर्वत्र । प्रीतिरेवं यतो मम ॥ १६ ॥ युग्मं ॥

पछी ते संप्रति राजाए ते ( सर्व ) राजाओने कह्युं के, मारे तमारां धननुं प्रयोजन नथी, परंतु जो तमो मने तमारो स्वामी मानता हो, तो हवे बन्ने लोकमां सुखदायी एवा आ जैन धर्मने पोतपोताना देशोमां सर्व जगोए प्रवर्तावो? अने तेम करवाथी मने घणी खुशी उपजशे. ॥ १५ ॥ १६ ॥

ततस्तेऽपि गतास्तत्र । जिनचैत्यान्यकारयन् ॥ कुर्वंति तत्र यात्राश्च । रथयात्रोत्सवाद्भुताः ॥ १७ ॥

पछी ते सघळा राजाओए पण पोतपोताना देशमां जइ, त्यां जिनमंदिरो कराव्यां, अने रथयात्राना महोत्सववाळी अद्भुत यात्राओ करी. ॥ १७ ॥

सदैवोपासते साधू-नमारीं घोषयंति च ॥ राजानुवृत्त्या तत्रापि । लोकोऽभूद्धर्मतत्परः ॥ १८ ॥

वळी तेओ त्यां हमेशां साधुओनी उपासना करवा लाग्या, तथा अमारी पडहनी उद्घोषणा करावया लाग्या, तथा एवी रीते राजाना अनुवर्तनथी त्यांना लोको पण जैनधर्ममां आदरयुक्त थया. ॥ १८ ॥

ततश्च साधुसाध्वीनां । विहर्तुं साधुचर्यया ॥ प्रत्यंता अपि देशास्ते । मध्यदेशा इवाभवन् ॥१९॥

अने तेथी ते छेडे आवेला देशो पण मध्यदेशोनीपेठे साधुसाध्वीओने मुनिआचारमुजब विचरवालायक थया. ॥ १९ ॥

अन्यदा संप्रतिर्दध्यौ । साधवो विहरंति चेत् ॥ अनार्येष्वपि देशेषु । स्यात्तल्लोकोऽपि धर्मवित् ।२०।

पछी एक वखते ते संप्रतिराजाए विचार्युं के, जो साधुओ अनार्यदेशोमां पण विहार करे, तो त्यांना लोको पण जैनधर्मना जाणकार थाय. ॥ २० ॥

अथानार्यानपि नृपा-नादिदेश विशांपतिः ॥ करं यूयं दद्ध्वं मे । यथा गृह्णंति मद्भटाः ॥२१॥

( एम विचारि ) ते संप्रतिराजाए ते अनार्य देशोना राजाओने पण एवो हुकम कर्यो के, मारा सुभटो जे रीते तमारी पासेथी कर ले, ते रीते तमारे आपवो ? ॥ २१ ॥

ततोऽनुशिष्य सुभटान् । प्रैषयन्मुनिवेषिणः ॥ तेऽपि तत्रागतास्तेषां । साधुचर्यामुपादिशन् ॥२२॥

पछी राजाए पोताना सुभटोने समजावीने मुनिओनो वेष पहेरावी त्यां मोकल्या, त्यारे ते मुनिवेषधारी सुभटो पण त्यां आवीने तेओने साधुओ माटे नीचे मुजब आचार शिखाववा लाग्या. ॥ २२ ॥

**आगच्छतामभिगमो-ऽनुयानं गच्छतां तथा ॥ क्रियते नः प्रणामश्च । भून्यस्तकरजानुकैः ॥२३॥**

अमो ज्यारे आवीयें त्यारे अमारी सन्मुख आववुं, तथा जइयें त्यारे पाछळ आववुं, वळी भूमिपर हाथ तथा ढुंटणो राखीने अमोने नमस्कार करवो. ॥ २३ ॥

**अन्नं पानं च शय्या च । वस्त्रपात्रादिवस्तु च ॥ द्विचत्वारिंशता दोषै-रुज्झितं नः प्रदीयते ॥२४॥**

वळी बेंतालीस दोषोथी रहित एवां भोजन, पाणी, बीछानां, वस्त्र तथा पात्रआदिक वस्तुओ अमोने आपवी. ॥ २४ ॥

**पठ्यंते च नमस्कार-मंत्रशक्रस्तवादयः ॥ अर्हतस्त्रिः प्रपूज्यंते । जीवेषु क्रियते कृपा ॥ २५ ॥**

वळी नवकार मंत्र तथा शक्रस्तव आदिकनो तमारे पाठ करवो, अरिहंत प्रभुनी प्रतिमाओनुं त्रिकाळ पूजन करवुं, अने सर्व जीवो प्रते दया करवी. ॥ २५ ॥

**एवं च संप्रतिर्भावी । सुप्रसन्नोऽन्यथा न तु ॥ तेऽपि तत्तच्च्यधुः सर्वं । ततस्तोषयितुं नृपं ॥२६॥**

तथा एम करवाथी संप्रतिराजा तमारापर प्रसन्न थशे, परंतु बीजी कोइ रीते ते प्रसन्न नही थाय. त्यारे ते अनार्य राजाओ पण संप्रतिराजाने खुशी करवा माटे ते ते सघळुं करवा लाग्या. ॥ २६ ॥

सुभटा अप्यथागत्य । तद्वृत्तं भूभुजेऽभ्यधुः ॥ गुरून् विज्ञपयामास । ततः संप्रतिरन्यदा ॥ २७ ॥

पछी ते सुभटोए (पाछा) आवीने संमति राजाने ते सर्व वृत्तांत कह्युं, तेथी एक दिवसे ते संमति राजाए गुरुमहाराजने विनंति करी के. ॥ २७ ॥

प्रभो नानार्यदेशे किं । विहरंति सुसाधवः ॥ गुरुः स्माह जनस्तत्रा-ऽज्ञानी न स्याद् व्रतं ततः ।२८।

हे भगवन्! अनार्य देशोमां उत्तम साधुओ शामाटे विचारता नथी? त्यारे गुरुमहाराजे कह्युं के, ते देशोमां लोको अज्ञानी होवाथी मुनिव्रत पाली शकाय नही. ॥ २८ ॥

राजा प्रोचे प्रभो तर्हि । तदाचारं परीक्षितुं ॥ नियोजयध्वं प्रथमं । चरानिव तपोधनान् ॥ २९ ॥

त्यारे राजाए कह्युं के, हे भगवन्! त्यारे प्रथम ते अनार्य लोकोना आचारनी परीक्षा करवा माटे गुप्त जासुसोनी पेठे त्यां केटलाक साधुओने मोकली जुओ? ॥ २९ ॥

ततो गुरुर्मुनीन् कांश्चि-द्भूपतेरुपरोधतः ॥ आदिदेश विहाराय । तेष्वांध्रद्रमिलादिषु ॥ ३० ॥

पछी ते संमतिराजाना आग्रहथी गुरुमहाराजे ते आंध्र तथा द्रमिलआदिक अनार्यदेशोमां विहार करवामाटे केटलाक मुनिओने हुकम कर्यो. ॥ ३० ॥

तानप्यालोक्य तेऽनार्या । विशिष्टानिव भूभुजः ॥ वस्त्रान्नपानपात्राद्यै-स्तथैव प्रत्यलाभयन् । ३१ ।

ते मुनिओने पण ते अनार्यलोको संप्रतिराजाना महोटा अमलदारोनीपेठे जाणीने तेवीज रीते वस्त्र, भोजन पाणी तथा पात्र आदिकवडे प्रतिलाभवा लाग्या. ॥ ३१ ॥

**तदीयश्रावकत्वेन । रंजितास्ते तपोधनाः ॥ आगत्य स्वगुरोः सर्वं । कथयामासुरुन्मुदः ॥ ३२ ॥**

एवी रीतना तेओना श्रावकपणाथी खुशी थयेला ते मुनिओए पण पोताना गुरुपासे आवीने हर्षपूर्वक सर्व वृत्तांत कही संभळाव्यो. ॥ ३२ ॥

**एवं संप्रतिराजस्य । बुद्ध्या सद्धर्मशुद्धया ॥ नित्यं साधुविहारेण । संजातास्तेऽपि भद्रकाः ॥३३॥**

एवी रीते ते संप्रतिराजानी सद्धर्मथी निर्मल थयेली बुद्धिवडे हमेशना मुनिविहारवडे ते अनार्यदेशना लोको पण भद्रकपरिणामवाला थया. ॥ ३३ ॥

**स्मृत्वा प्राग्जन्मरंकत्वं । नरेंद्रोऽन्येद्युरात्मनः ॥ पुर्याश्चतुर्षु द्वारेषु । सत्रागारानकारयत् ॥ ३४ ॥**

पछी एक दिवसे ते संप्रतिराजाए पोताना पूर्वजन्मना रंकपणाने याद करीने पोताना नगरना चारे दरवाजे दानशाळाओ करावी. ॥ ३४ ॥

**अनात्मपरत्यागेन । यथेच्छमनिवारितं ॥ दीयते भोजनं तत्र । सर्वेषामपि नित्यशः ॥ ३५ ॥**

ते दानशाळाओमां स्वपरना विभागविना, अर्थात् कोइपण प्रकारना अंतरविना इच्छा मुजब कंइपण अटकाव विना हमेशां सर्व लोकोने भोजन आपवामां आवतुं हतुं ॥ ३५ ॥

**तत्रावशिष्टं चान्नादि । गृह्णते तन्नियोगिनः ॥ उद्धृतग्राहिणो राज्ञा । पृष्टास्तेऽप्येवमूचिरे ॥ ३६ ॥**

त्यां बाकी वधतुं अनाजआदिक हमेशां तेना कारभारीओ लेता हता, तेथी राजाए ते संबंधमां पूछवाथी ते वधेलुं अन्न आदिक लेनाराओए पण तेमज कह्युं. ॥ ३६ ॥

**नृपस्तानादिशद्देयं । युष्माभिर्यतिनामिदं ॥ प्रासुकं चैषणीयं च । सर्वमन्नाद्यमुद्धृतं ॥ ३७ ॥**

पछी राजाए तेओने फरमाव्युं के, हवेथी बाकी वधतुं ते सघळुं प्रासुक तथा एषणीय अन्नआदिक तमारे मुनिओने आपवुं. ॥ ३७ ॥

**भक्त्या परवशः क्रीत–दोषं राजा विदन्नपि ॥ इदं चोवाच तान् वृत्त्यै। वित्तं वो दास्यते मया ।३८।**

मुनिभक्तिथी परवश थयेला ते संप्रतिराजाए “ क्रीतदोष ” एटले वेचातुं लेइ मुनिने आपवारूप दोषने जाणतां छतां पण तेओने कह्युं के, तमोने हुं तेने बदले तमारी आजीविकामाटे द्रव्य आपीश. ॥ ३८ ॥

**ततो राजाज्ञया तेऽपि । साधुभ्यो ददुरुद्धृतं ॥ तेऽप्यनौद्देशिकीभूत–मिदानीमित्यगृह्णत ॥ ३९ ॥**

पछी राजानी आज्ञाथी दानशाळाना ते कारभारीओ पण बाकी वधतुं भोजन साधुओने आपवा लाग्या, अने आ " अमारामाटे करेलुं नथी " एम विचारी ते साधुओ पण ते आहार लेवा लाग्या. ॥ ३९ ॥

अथादिशत्कांदविकान् । दौष्यिकान् गांधिकांस्तथा ॥ तैलाज्यदधिपक्कान्न-फलादिवणिजोऽपिसः ४०

पछी ते संप्रतिराजाए कंदोइ, कापडीया, गांधी, तथा तेल, घृत, दहीं, पक्वान्न अने फलआदिकना व्यपारीओने पण हुकम कर्यो के, ॥ ४० ॥

गृह्णते साधवो यद्य-त्तत्तद्देयं तदीप्सितं ॥ मत्तस्तन्मूल्यमादेयं । निःशेषं क्रयिकादिव ॥ ४१ ॥

साधुओ जे जे वस्तुओ ग्रहण करे, ते ते तेओनी इच्छा मुजब तमारे तेओने आपवुं, तथा तेनुं सघळुं मूल्य खरीद करनारपासेथी जेम तेम मारीपासेथी लेइ जवुं. ॥ ४१ ॥

राजपूज्यान् सुसाधूंस्ता-नाकार्याकार्य तेऽप्यथ ॥ इष्टेष्टतमवस्तूनि । ददिरे नाक्तिका इव ॥ ४२ ॥

हवे ते दुकानदारो पण राजपूज्य एवा ते उत्तम साधुओने भक्तिवंतोनी पेठे बोलावी बोलावीने श्रेष्टमां श्रेष्ट वस्तुओ आपवा लाग्या. ॥ ४२ ॥



जानन्नपि सदोषं त-त्सर्वमार्यसुहस्त्यपि ॥ सेहे स्नेहेन शिष्यस्य । को न मोहेन मोहितः ॥४३॥

आ सघळुं दोषयुक्त छे, एवुं जाणतां छतां पण श्रीआर्यसुहस्तिजी महाराज ( पोताना पुर्वभवना ) शिष्यना स्नेहथी ते सहन करता हता, केमके मोहवडे कोण मोहित नथी थयो? ॥ ४३ ॥

इतश्च गच्छबाहुल्या–द्भिन्नोपाश्रयस्थितः ॥ गुरुर्महागिरिः सर्वं । तद् ज्ञात्वोचे सुहस्तिनं ॥४४॥

हवे एवामां त्यां साधूओनो समुदाय घणो होवाथी जूदा उपाश्रयमां रहेला श्रीआर्यमहागिरिजी महाराज ते सघळुं जोइने आर्यसुहस्तिजीने कहेवा लाग्या के, ॥ ४४ ॥

अनेषणीयं राजान्नं । संपूर्णदशपूर्व्यपि ॥ अविदन्निव गृह्णासि । किमाचार्य विदन्नपि ॥ ४५ ॥

अहो! सुहस्तिआचार्य! तुं संपूर्ण दशपूर्वोना ज्ञानवाळो होवा छतां, अने तेथी जाणतां छतां, पण अज्ञानीनी पेठे ( मुनिओने ) लेवो न कल्पे एवो " राजपिंड " केम ग्रहण करे छे? ॥ ४५ ॥

सुहस्त्युवाच भगवन् । लोकः पूजितपूजकः ॥ राजपूज्यान् विदन्नस्मान् । यच्छत्येवं तदादृतः ॥४६॥

त्यारे आर्यसुहस्तिजीए कह्युं के, हे भगवन्! लोको तो पूजाताने पूजनारा होय छे, अने तेथी अमोने राजपूज्य मानीने आदरमानथी एवी रीते ते ते वस्तुओ आपे छे. ॥ ४६ ॥

ततस्तं मायिनं मत्वा । रोषादार्यमहागिरिः ॥ बभाषे नौ विसंभोगः । परस्परमतः परं ॥ ४७ ॥

पछी तेमने मायावी जाणीने क्रोधथी आर्यमहागिरिजी महाराजे कह्युं के, हवेथी आपण बन्नेवच्चे परस्पर भिन्नपणुं छे, अर्थात् आपण बन्नेवच्चे हवेथी जूदाइ छे. ॥ ४७ ॥

सदृक्कल्पैः सदृक्छंदैः । संभोगः साधुभिः सह ॥ विपरितस्वरूपस्त्व-त्वमस्माकं पुनर्बहिः ॥ ४८ ॥

तुल्य आचार तथा तुल्य सामाचारीवाळा साधुओ साथे व्यवहार होई शके, अने तुं तेथी विपरितपणे वर्ततो होवाथी अमारा संघाडाथी बहार छो. ॥ ४८ ॥

भीतः सुहस्त्यपि ततो । वंदित्वार्यमहागिरिं ॥ ऊचे विनयनम्रांगः । कंपमानकरांजलिः ॥ ४९ ॥

( ते सांभळी ) आर्यसुहस्तिजी महाराज पण भय पामीने आर्यमहागिरिजी महाराजने वांदीने, अने विनयथी शरीर नमावीने कंपायमान थता बन्ने हाथो जोडीने कहेवा लाग्या के, ॥ ४९ ॥

अपराधं क्षमस्वैक-मपराधवतः प्रभो ॥ अपुनःकरणेनास्तु । मिथ्यादुष्कृतमत्र मे ॥ ५० ॥

हे भगवन्! अपराधी एवो जे हुं, तेना आ एक अपराधमाटे क्षमा करो? फरीने एम नही करुं, तथा आ अपराधमाटे हुं "मिथ्या दुष्कृत" आपुं छुं ॥ ५० ॥

महागिरिस्ततः स्माह । दोषः कोऽत्र तवाथवा ॥ इदं प्रोवाच भगवान् । वीरस्वामी स्वयं पुरा ५१

त्यारे आर्यमहागिरिजी महाराजे कह्युं के, अथवा आ बाबतमां तारो शुं दोष छे? केमके भगवान श्रीमहावीरस्वामीए पोतेज प्रथम कह्युं छे के, ॥ ५१ ॥

इहास्माकीनसंताने । स्थूलभद्रादतः परं ॥ पतत्प्रकर्षा साधूनां । सामाचारी भविष्यति ॥५२॥

अमारी आ परंपरामां स्थूलभद्र पछी साधुओनी सामाचारी पडता प्रकर्षवाळी ( उतरता दरज्जावाळी ) थशे ॥ ५२ ॥

तस्माच्चानंतरावावा-मेव तीर्थप्रवर्तकौ ॥ अभूव तदिदं स्वामि-वचः सत्यापितं त्वया ॥ ५३ ॥

अने ते श्रीस्थूलभद्र पछी आपण बन्ने तीर्थ प्रवर्तावनारा थया, अने तें प्रभुना ते वचन सत्य करी बताव्युं. ॥ ५३ ॥

इत्युदित्वा तमाचार्य । सद्भावक्षमितागसं ॥ पुनः सांभोगिकं चक्रे । गुरुरार्यमहागिरिः ॥ ५४ ॥

एम कहीने सत्य भावथी अपराधने खमावनारा एवा ते श्री आर्यसुहस्तिजी महाराजने श्रीआर्यमहागिरिजी गुरुमहाराजे पाछा पोताना संघाडामां जोड्या ॥ ५४ ॥

उक्तश्च संप्रतिरपि । महाराज न कल्पते ॥ सुसाधूनां राजपिंडो-ऽनेषणीयो विशेषतः ॥ ५५ ॥

पछी तेमणे संप्रतिराजाने कह्युं के, हे राजन्! उत्तम साधुओने राजपिंड लेवो कल्पे नही, केमके ते विशेष प्रकारे साधुओमाटे अग्राह्य छे. ॥ ५५ ॥

निषिद्धो भरतस्यापि । राजपिंडः पुरा किल ॥ श्रीयुगादिजिनेंद्रेण । स्वर्गमिंद्रादिसाक्षिकं ॥ ५६ ॥

॥ १०४ ॥

केमके पूर्वे पण श्री ऋषभदेव प्रभुए पोते इंद्रआदिकनी साक्षीयें भरतमहाराजना पण राजपिंडने साधूओमाटे निषेध्यो हतो. ॥ ५६ ॥

दानपात्रं च तस्यापि । श्रावकः श्राविकाजनः ॥ स्वामिनाख्यायि तद्वत्स । गच्छ त्वमपि तत्पथं ॥५७॥

अने प्रभुए ते भरतमहाराजने पण श्रावक तथा श्राविकाओने तेवां दाननां पात्ररूप कह्यां हतां, माटे हे वत्स ! तुं पण तेज मार्गे चाल ! ॥ ५७ ॥

अनुशास्तिं गुरोस्तां स । निर्वृत्तेः पदवीमिव ॥ आदाय परमानंद–मग्नो धर्ममपालयत् ॥ ५८ ॥

एवी रीतनी मोक्षनी सडकसरखी गुरुमहाराजनी ते शिखामण ग्रहण करीने ते संप्रतिराजा परम आनंदमां मग्न थइने धर्मनुं पालन करवा लाग्यो. ॥ ५८ ॥

आर्यानार्येषु देशेषु । हृदयस्थानके नृणां ॥ स्वामाज्ञामिव सम्यक्त्व–मुवापावर्धयच्च सः ॥५९॥

एवी रीते ते संप्रतिराजाए आर्य तथा अनार्य देशोमां पण माणसोना हृदयमां पोतानी आज्ञानी पेठे सम्यक्त्वरूपी बीज वाव्युं, अने ते वृद्धि पाम्युं. ॥ ५९ ॥ 

श्री संप्रतिः क्षितिपतिर्जिनराजधर्मे । सम्यक्त्वमूलममलं परिपाल्य सम्यक् ॥

भुक्त्वा दिवः श्रियमथानुपमामनर्घ्यां । मुक्तिं गमिष्यति शुभैकमतिः क्रमेण ॥ ६० ॥

एवी रीते ते फक्त शुभ कार्योंनीज बुद्धिवाळो श्रीसंप्रतिराजा समकीतमूल निर्मल जैनधर्मने सारी रीते आराधीने देवलोकनी लक्ष्मी भोगव्याबाद अनुपम तथा अमूल्य एवी मुक्तिमां अनुक्रमे जशे. ॥ ६० ॥

सम्यक्त्वरत्नं तदिदं विशुद्ध–मासाद्य युष्माभिरपीह भव्याः ॥
स्वपुत्रवन्निर्मलचित्तरंगैः । पाल्यं सदा निर्वृतिमाप्तुकामैः ॥ ६१ ॥

माटे हे भव्यजनो! एवी रीतनुं निर्मल सम्यक्त्वरूपी रत्न अहीं पामीने मोक्ष मेळववानी इच्छावाळा एवा तमोए हमेशां तेने मनना निर्मल उल्लासथी पोताना पुत्रनी पेठे पालवुं ॥ ६० ॥

॥ समाप्तोऽयं ग्रंथो गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥ श्रीरस्तु ॥